बुन्देलखण्डीय–आनन्दराय–महीप–सभापण्डित–
डीनरहरिदीक्षित–सुनू–
श्रीसामराजदीक्षित–प्रणीतं

धूर्तनर्तकम्

(प्रहसनम्)

मूलग्रन्थसम्पादकः–
प्रो.बाबूलालशुक्लः शास्त्री
एम.ए.साहित्याचार्यः,

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
नवदेहली - 110016

संस्कृत-विद्यापीठ-प्रकाशनमालायाश्चतुर्विशं पुष्पम्

बुन्देलखण्डीय-'आनन्दराय' महीप-सभापण्डित-
श्रीनरहरिदीक्षित-सूनु-
श्रीसामराजदीक्षित-प्रणीतं

धूर्तनर्तकम्

[प्रहसनम्]

प्रधानसम्पादकः —
डॉ० सी० आर० स्वामिनाथः,
एम० ए०, पी-एच० डी०, प्राचार्यः

मूलग्रन्थसम्पादकः —
प्रो० बाबूलालशुक्लः शास्त्री,
एम० ए०, साहित्याचार्यः,
संस्कृत-प्राध्यापकः —
शासकीयकला-वाणिज्य-महाविद्यालयः, इन्दौर (म० प्र०)

सम्पादक उपोद्घातलेखकश्च —
डॉ० रुद्रदेवत्रिपाठी
एम० ए०, पी-एच० डी०, आचार्यः
अनुसन्धान-प्रकाशनविभागाध्यक्षश्च

श्रीलालबहादुरशास्त्रीकेन्द्रीय-संस्कृत-विद्यापीठम्
१/६ शान्तिनिकेतनम्, नई दिल्ली-२१

प्रकाशकः—
डॉ० सी० आर० स्वामिनाथः, प्राचार्यः
श्रीलालबहादुरशास्त्रीकेन्द्रीयसंस्कृत-विद्यापीठम्
१/६ शान्तिनिकेतनम्, नई दिल्ली-२१
दूरभाषाङ्कः—६७१४३०

प्रथमं संस्करणम्—५०० प्रतयः
सन् १९७८ ई०

मूल्यम्— २.५० (रूप्यकं सार्धद्वयम्)

मुद्रकः
अमर प्रिंटिंग प्रेस, ८/२५ विजय नगर, दिल्ली-९

प्रास्ताविकम्

नाट्यसाहित्यदृष्ट्याऽस्माकं संस्कृतसाहित्यं परमसमृद्धं विद्यते । साहित्य-निर्माण-समकालादेव कवयो यथा नानाविधानि काव्यानि विरच्य साहित्यभाण्डागारं पूरितवन्तस्तथैव नाट्यानि रचयित्वाऽपि तत्साहित्याभिवृद्धिं साधितवन्तः । बौद्धकवेर-श्वघोषस्य महाकवेर्भासस्य तथा महाकवेः कालिदासस्य नाट्यरचना अस्मिन् साहित्ये सर्वेषामप्युत्तरकालिकानां नाटकनिर्मातॄणां कृते प्रधानरूपेण मार्गदर्शिका अभूवन् ।

संस्कृत-रूपकसाहित्येतिहासरचयितॄणां रचनासु प्रायेण तान्येव रूपकाणि रूपकप्रभेदान्तर्गतानि नाटकानि च गणनापथं प्राप्तानि यानि भूयसा कालेन प्रसिद्धिं गतान्यासन् । तथापि यत्र तत्र प्राच्यग्रन्थसङ्ग्रहागारेष्वद्यापि सुबहूनि रूपकाणि प्रकाशनं प्रतीक्षमाणानि विलोक्यन्ते ।

मयाऽऽत्मनो गवेषणा-प्रवृत्तिरस्मिन्नेव पथि नियोजयता कियन्ति चिद् रूप-काणि दुर्लभानि सम्पाद्य प्रकाशितानि । येषु—घनश्यामकवेः "**नवग्रहचरितम्**", ब्रह्मत्र-वैद्यनाथप्रणीतो "**भैरव-विलासः**", (प्रेक्षणकम्), श्रीरूपगोस्वामि-प्रभुपादानां "**दानके-लिकौमुदी**" (भाणिका)[1] रुद्रचन्द्रदेवस्य "**उषारागोदया**" नाटिका[2] शिवकविप्रणीता '**वविकंचन्द्रोदय-नाटिका**' चेत्यादयः संस्कृतपत्र-पत्रिकासु प्रकाशिताः सन्ति ।

अन्यानि च कानिचिद् रूपकाण्यद्य यावदप्रकाशितप्रायाणि मया विविधाभ्यः पाण्डुलिपिभ्यः सङ्गृह्य सम्पाद्य च सज्जीकृतानि सुरक्षितानि । तेष्वेवेदं '**धूर्तनर्तकं**' नाम प्रहसनमद्य प्रकाशनं प्राप्नोति ।

श्रीसामराजदीक्षितप्रणीतस्य '**धूर्तनर्तकं**'नामप्रहसनस्येदं संस्करणं विद्वत्तल्ल-जानां करकमलेषु समुपस्थापयतो मे चेतः परमं प्रमोदमनुभवति । संस्करणमेतद् मातृकापुस्तकत्रयसाहाय्येन सम्पादितम् । तस्य चेदं विवरणम् —

(१) 'उज्जयिनीस्थात्' सिन्धियाप्राच्यविद्यासंशोधनमन्दिरात् प्रतिलिपिकृतं देवनागराक्षरलिखितं १३ पत्रात्मकम् 'अ' संज्ञकमेकं पुस्तकं सम्पूर्णम् ।

---

१. इमास्तिस्रः कृतयो मत्सुहृद्वर-डॉ० रुद्रदेवत्रिपाठिसम्पादिते '**मन्दसौर**' मध्यप्रदे-शतः प्रकाशिते '**मालव-मयूर**'नाम्नि संस्कृतमासिकपत्रे क्रमशः प्रकाशिताः । चतुर्थी कृतिश्च मध्यप्रदेशस्य-जबलपुर-विश्वविद्यालयस्य शोधपत्रिकायां प्रका-शिता । अन्त्या च देहलीतः प्रकाशिते '**संस्कृत रत्नाकर**' पत्रे मुद्रिता ।

(२) कलिकातानगरस्थाद् एशियाटिक-सोसायटी-हस्तलिखित-ग्रन्थागारात् समुपलब्धं देवनागराक्षरलिखितं १२ पत्रात्मकं 'ब' संज्ञकं द्वितीयम-सम्पूर्णञ्च पुस्तकम्।

(३) अस्माकं संग्रहस्था पाण्डुलिपिः (अपूर्णा)।

धूर्तनर्तकस्य रचयिता सामराजदीक्षितो नरहरिदीक्षितसूनुः बुन्देलखण्डीयस्य आनन्दरायमहीपस्य सभायां पण्डितश्च आसीत्। एतेन '**धूर्तनर्तकं**' नाम प्रहसनं तदनु '**श्रीदामचरितं**' नाम नाटकञ्च प्रणीतम्। तत्र च धूर्तनर्तकस्य श्रीदामचरित-प्रस्तावनायामुल्लेखाद् धूर्तनर्तकस्यैव पूर्वभावित्वमिति सुस्पष्टमेव। श्रीदामचरितस्य रचना १६८१ ई० वत्सरेऽभूदिति ऐतिह्यविदां मतमतः श्रीसामराजदीक्षितस्य स्थितिकालः सप्तदशशताब्द्या उत्तरार्द्धे आसीदिति सुस्पष्टमेव।

एतस्य सम्पादनकर्मणि साहाय्यमाचरद्भ्य उपर्युक्तसंस्थानाधिकृद्भ्यः पुस्तकादि-सुलभकरणार्थं धन्यवादं साभिनन्दनम्। एतस्य प्रकाशनादिषु च परमं साहाय्यं कुर्वतां विद्यापीठस्य प्राचार्याणां **डॉ० सी० आर० स्वामिनाथमहोदयानां** तथा उपोद्घात-लेखनपुरस्सरं '**शोध-प्रभा**' पत्रिकायां पुस्तकरूपेण च सुसम्पाद्य प्रकटीकुर्वतां **डॉ० रुद्रदेवत्रिपाठिमहाभागानां** सुहृत्तमानामपि चोपकारभारमावहन् धन्यवादमर्पयँश्च तेषामुपकृतं संस्मरामि।

एतस्मिन् संस्करणे प्रमाददृष्टिदोषेभ्यश्च जातानि स्खलितानि सहजसौजन्येन प्राज्ञाः संशोधयन्तु कुर्वन्तु च ममेमं श्रमं सफलमिति निवेद्य रमापतिमन्ते प्रार्थये यदेतत् प्रहसनं सहृदयहृदयेषु परमां मुदमादधद्विलसतु। इति।

इन्दौर (म० प्र०)
माघशुक्ला ५, सं० २०३४

विदुषामाश्रवः
बाबूलालशुक्लः शास्त्री

श्रीसामराजदीक्षित-प्रणीतं

धूर्तनर्तकम्

[प्रहसनम्]

पात्र-परिचयः

१-**सूत्रधारः**	—	प्रहसन-प्रवर्तकः।
२-**नटी**	—	सूत्रधारस्य सहधर्मिणी।
३-**मूढेश्वरः**	—	गुरुदेवः (प्रहसने नायकः) वृद्धः।
४-**जगद्वञ्चकः**	—	मूढेश्वरस्य प्रथमः शिष्यः।
५-**मुखरः**	—	मूढेश्वरस्य द्वितीयः शिष्यः।
६-**ब्रह्मानन्दस्वामी**	—	मूढेश्वरस्य प्रथमः प्रियवयस्यः।]
७-**पापः**	—	ब्रह्मानन्दस्वामिनः प्रियान्तेवासी।
८-**शुण्ठाचार्यः**	—	मूढेश्वरस्य द्वितीयः प्रियवयस्यः।
९-**वसन्तलतिका**	—	मूढेश्वरस्य प्रेयसी, धर्मचारिणी पुरनारी वा।
१०-**राजा (पापचारः)**	—	राजकुलनायकः।
११-**विदूषकः**	—	राज्ञः पापचारस्य मित्रम्।
१२-**प्रतीहारः**	—	पापचारस्य सेवकः।
१३-**पुरुषः**	—	पापचारस्यापरः सेवकः।
१४-**निर्मेघाश्रयः**	—	मूढेश्वरस्य गुरुः।
१५-**मङ्गलकुठारमिश्रः**	—	शुण्ठाचार्यस्य शिष्यः।
१६-**वैतालिकः**	—	नेपथ्ये समयसूचको मागधः।

—: ० :—

'प्रहसन'-परम्परा-पर्यालोचनम्

धूर्तनर्तक प्रहसनस्योपोद्घातः

श्रव्याद् दृश्यं विशिष्यते

अस्त्यपूर्वं परमरमणीयं च संस्कृत-सरस्वत्या निधानम्। अनन्तानि रत्नान्यत्र निसर्गप्रभावशालीनि विद्योतन्ते। अत एवेदं निधानं रत्नाकरतामपि सार्थकीकरोति। यथा पारावारे नानाविधानि रत्नानि प्रत्नानि भवन्ति तथैव नूतनान्यपि निरन्तरं प्रभवन्ति, एवमेव संस्कृतवारान्निधावपि रत्नस्थितिः सुसम्भवा।

साहित्यस्य सृष्टौ नानात्वं निश्चप्रचमेव। अस्मिन् नानात्वे रूपकाणां स्थितिः परममहत्त्वशालिनी। काव्यस्य दृश्यश्रव्यभेदयोः[1] कस्य बाहुल्यमिति कथयितुं न शक्यते, परं दृश्यकाव्यानामपि नास्ति नैयून्यमिति कथने नास्ति कापि विप्रतिपत्तिः। काव्यशास्त्रेष्वपि दृश्यकाव्य-विवेचनेनैकं स्वतन्त्रं स्थानं संरक्षितम्।[2] उच्यते च— "**श्रव्याद् दृश्यं विशिष्यते**" इति।

दृश्यकाव्य-मीमांसा

समस्तस्य लोकस्य मानसीं शान्तिं दैहिकीं च विश्रान्तिं कलयितुं नाट्यस्य प्रादुर्भावः—

'दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम्।
विश्रामजननं लोके नाट्यमेतद् भविष्यति॥ १।११२॥ (ना० शा०)

इति कथयता महर्षिणा भरतेन दृश्यकाव्यात्मकस्य नाट्यस्य विशिष्टं **स्थानं** स्वयमेव साधितम्। अत्र वेदानां सारसमवायोऽपि विद्यत इत्यपि "जग्राह पाठ्‌ ...

---

१. दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्। (सा० द० ६ परिच्छेदे।)

२. काव्यशास्त्रग्रन्थे भरतप्रणीत'**नाट्यशास्त्र**'स्य प्राथम्यमपि सुप्रसिद्धमेव। तथा च अलर्डाइसनिकोलमहोदयस्येदं कथनमपि स्मरणीयं विद्यतेयत्— 'साहित्यप्रकारेषु कृत्स्नेषु नाट्यं हि नामाद्‌भुततमोऽनिर्वचनीयतमो हृदयावर्जकतमश्च प्रकार इति।" (थियोरी आफ, ड्रामा)

दित्यादिपद्येन (१।१७) तत्रैव प्रदर्शितम्। लक्ष्यं चास्य विशुद्धानन्दवितरणमेव। रसोद्बोधनमेव केन्द्रीकृत्य नाट्यं प्रवर्तते। नाट्ये रसस्य सञ्चारं विषयीकुर्वता भरतेन—

यथा बीजाद् भवेद् वृक्षो वृक्षात् पुष्पं फलं यथा।
तथा मूलं रसाः सर्वे तेषु भावा व्यवस्थिताः॥ ना० शा० ६। ३०८॥

इति प्रतिपादितम्। एवं प्राधान्येन रसनिष्पत्तिपराणि दृश्यकाव्यानि—नाटचानि भवन्ति।

नाट्यस्य च पुनः कथावस्तु-नायक-फलादिभेदानुमुख्यत्वेन दश प्रकाराः कतिपये चोपप्रकारा भवन्ति। तेषु दश नामानि "**नाटक-प्रकरणाङ्क-व्यायोग-समवकर-भाण-वीथी-प्रहसन-डिमेहामृगा**"दीनि विद्यन्ते। प्रत्येकं प्रकारस्य लक्षणं शास्त्रेषु विशदरूपेणापि दर्शितम्। एतेष्वेव प्रहसनमप्येकः प्रकारः। अत्रावसरप्राप्तस्यास्यैव कश्चिद् विचारः क्रियते।

शास्त्रीयदृष्ट्या प्रहसनं तत्स्वरूपञ्च

नाट्यशास्त्रे महर्षिणा भरतेन प्रहसनस्य लक्षणमित्थं प्रदर्शितम्—

प्रहसनमतः परमहं सलक्षणं सम्प्रवक्ष्यामि।
वक्ष्यामि तयोर्युक्त्या पृथक् पृथग्लक्षणविशेषम्॥ १०२॥
भगवत्तापसविप्रैरन्यैरपि हास्यवाद-सम्बद्धम्।
कापुरुषसम्प्रयुक्तं परिभाषाभाषणप्रायम्॥ १०३॥
अविकृतभाषाचारं विशेषभावोपपन्नचरितपदम्।
नियतगतिवस्तुविषयं शुद्धं ज्ञेयं प्रहसनं तु॥ १०४॥
वेश्याचेटनपुंसकविटधूर्ता बन्धकी च यत्र स्युः।
अनिभृतवेषपरिच्छदचेष्टितकरणैस्तु सङ्कीर्णम्॥ १०५॥
लोकोपचारयुक्ता या वार्ता यश्च दम्भसंयोगः।
स प्रहसने प्रयोज्यो धूर्तप्रविवादसम्पन्नः॥ १०६॥
वीथ्यङ्गैः संयुक्तं कर्तव्यं प्रहसनं यथायोगम्। (अष्टादशेऽध्याये)

उत्तरकालिकैराचार्यैश्च प्रामुख्येनास्यैव यथाकथञ्चित् परिवर्तन-परिवर्धनपुरस्सरं पोषणं विहितम्। एतदनुसारं प्रहसनस्य विषयः केवलं हास्यमेव भवति। अस्य कथावस्तु कविकल्पितं नायकश्च धूर्तप्रायो भवति। नाटक-प्रकरण-भाणादिषु विदूषक-विटादिपात्रैर्हास्ययोजना प्रायेण क्रियते परं प्रहसने तस्या योजनायाः प्रामु-

रूयं भवत्यत एवास्य स्वातन्त्र्येण समुल्लेखः। अस्मिन् सन्धि-सन्ध्यङ्ग-लास्याङ्गाङ्का-दीनां योजना भाणवदेव भवति तथाऽऽरभटी वृत्तिर्विष्कम्भकः प्रवेशकश्च न भवन्ति। अङ्गी रसश्चास्य हास्यम्। विश्वनाथानुसारं प्रहसने वीथ्यङ्गयोजनैच्छिकी परं रामचन्द्रगुणचन्द्रावावश्यकीं मन्वाते। मुख्यरूपेणास्मिन्नेक एवाङ्क आद्रियते परं क्वचनाङ्कद्वयमपि दृश्यते। केचन दृश्येष्वपि विभज्य प्रास्तुवन्। महर्षिर्भरतप्रभृतयोऽस्य शुद्ध-सङ्कीर्णरूपाभ्यां भेदद्वयं दर्शयन्ति[१]। आचार्यो विश्वनाथस्तस्मिन् 'विकृत' नामकमेकं तृतीयं भेदमपि मनुते तथा शारदातनयश्चापि त्रिधात्वं स्वीकरोति।[२]

प्रहसनस्य भेदाः कथावस्तु पात्राणि च

शुद्ध-सङ्कीर्ण-विकृतात्मक-भेदत्रयशालिन्यस्मिन् 'प्रहसन'—संज्ञके हि रूपके तात्कालिके समाजे प्रचलितानाडम्बरान् पाखण्डांश्च प्रति परिहासमिश्रितो व्यङ्ग्यभावस्तिष्ठति। तत्र हि—(शुद्धे प्रहसने)

निन्द्य-पाखण्डि-विप्रादेरश्लीलासभ्यवर्जितम्।
परिहास-वचः प्रायं शुद्धमेकस्य चेष्टितम्॥[३]

इत्यनया दिशा समाजस्य शिष्टाः सम्भ्रान्ताश्च जना गृह्यन्ते, ये धर्म-कर्मणोः पाप-पुण्ययोर्वा व्याजेन छद्मवेशाः सन्तो निन्द्यप्रवृत्तिं स्वीकुर्वन्ति तेषां चित्रणं प्रस्तूयते। अत्राश्लीलक्रीडाकारिवर्णनानामभावादस्य शुद्धत्वं स्वीक्रियते।

सङ्कीर्णे प्रहसने तु—

सङ्कीर्णमुद्धताकल्प-भाषाचार-परिच्छदम्।
बहूनां बन्धकी-चेट-वेश्यादीनां विचेष्टितम्॥[४]

एतदाधारेणात्र बहूनां चरित्राणां मिश्रणं, स्वैरिणी-दास-वेश्या-शम्भली-धूर्त-वृद्ध-पाखण्डि-विप्र-भुजग-भटादीनां चरित्रं चित्रीयते। समाजस्य निम्नस्तरीयो वर्गोऽत्र

१-तद् द्विविधं शुद्धं सङ्कीर्णं च। आद्यं परिव्राट्तापसद्विजैरन्यैरपि हास्यकुशलैरारब्धम्। सङ्कीर्णं वेश्याविटनपुंसकादिभूषितं प्रथमं शशिविलासादि द्वितीयं भगवदज्जुकादि। अस्य च द्वावङ्कौ भवतः। मुख-निर्वहणसन्धी च।
(रसार्णवसुधाकरे)

२-भाणवत् स्यात् प्रहसनं तत् त्रिधा परिभिद्यते।
संरम्भिका स्यात् सङ्कीर्णा शुद्धा सागरकौमुदी।
कलिकेलिप्रहसनं यत्तद्वैकृतमीरितम॥ (भावप्रकाशनस्याष्टमाधिकारे)

१-नाट्यदर्पणे पृ० ११३,
२-तत्रैव।

परिहासप्रतीकतां श्रयते । अनयोरङ्कविषये श्रीमताऽभिनवगुप्तेन कस्याप्यन्यस्याचार्यस्य मतानुसारं शुद्धभेद एकाङ्कस्तथा सङ्कीर्णभेदोऽनेकाङ्कक इत्युल्लिखिम् ।

विकृते प्रहसने च—

विकृतं तु विदुर्यत्र षण्ढकञ्चुकितापसाः ।
भुजङ्ग-चारणभट-प्रभृतेर्वेषवाग्युताः ॥ (साहित्यदर्पणे ६।२६८) ॥

इत्युक्त्या शुद्ध-सङ्कीर्ण-लक्षणोक्तविषयाणां मिश्रणमत्र भवतीति प्रतीयते । यद्यपि विश्वनाथेन तत्रैव 'मुनिस्त्वाह—**इदं तु सङ्कीर्णेनैव गतार्थमिति मुनिना पृथङ्नोक्तम्**' इत्यपि कथितं तथापि यदस्य प्रकारस्य स्वातन्त्र्यं मन्यते चेत् तत्र षण्ढकञ्चुक्यादयः पात्रत्वेन संयोजनीयास्ते च वेष-वाग्भिर्जनानुरञ्जनं कुर्युरिति सूचितम् ।

एवं 'रञ्जनप्रधानं हास्यप्राप्यं प्रहसनं हास्यप्रधानवचनसम्बन्धशीलनादिना कुत्सितैः पुरुषैरत एव प्रहस्यमानैर्यत्र भाषाचारौ विकृतौ न स्यातां तया विधया निर्मीयत इत्यभिनवगुप्तपादा अभिनवभारत्यामाहुः ।

संस्कृत-साहित्ये हास्यम्—

गृहान्धकारेऽभिनवप्रकाशं, करोति हास्यं निरतं मनुष्याः ।
यदीयरम्यैः किरणैरपास्तं, भवत्यजस्रं भुवि दुःखजालम् ॥[१]॥

इति कस्यापीयं भणितिर्हास्यस्य माहात्म्यं वर्णयति । वैद्याश्च—

प्रशमाय च रोगाणां, शोकानाञ्च निवृत्तये ।
जठराग्नि-विवृद्धयै च, हास्यं दिव्यौषधं स्मृतम् ॥[२]

इति कीर्तयन्ति । अत एव समस्तोऽपि जनो हास्यं कामयते । तदर्थं च प्रार्थयते यत्—

यदा जीवनस्याखिलं वाटिकाया, व्यपेयादलं मञ्जुलं शाद्वलत्वम् ।
यदा पक्षिणो मौनतामाश्रयेयुस्तदा मेऽधरे संस्फुरेन्मञ्जुहासः ॥ १ ॥
यदा सूर्यवद्भासुरं राहुरास्यं, घनच्छायया संवृतं मेऽत्र कुर्यात् ।
तदा देव ! कार्या कृपाऽल्पीयसीयं, मदीयेऽधरे संस्फुरेन्मन्दहासः ॥ २ ॥
प्रपूर्णां च विश्वासभूमिं श्रिता ये, परित्यज्य मां कण्टकाकीर्णमार्गे ।
गताः स्युः सखायो यदा चात्मनीनास्तदा मेऽधरे संस्फुरेन्मन्दहासः ॥ ३ ॥

१-२-३—इमानि सर्वाण्यपि पद्यानि '**डिण्डिम**' नाम्नि मदीये विनोदकवितासंग्रहपुस्तके 'महाविदुषां हास्यसूक्तय' इति शीर्षके मयाऽनूद्य प्रकाशितानि । अन्त्यानि पञ्च पद्यानि 'योन नागोची'नामकस्य विदुषो विचाराणामनुवादरूपाणि सन्ति । (लेखकः)

यदा रुष्टता व्योमजन्या समग्रा, सुतीव्रा हते भागधेये मदीये ।
भवेद् वर्षितुं सज्जसज्जा दयालो, तदा मेऽधरे संस्फुरेन्मन्दहासः ॥ ४ ॥
विपद्वारिधाराभिरात्तेऽसहाये, मयि क्षीणभावं गते सर्वभावैः ।
इयं केवला वर्तते नाथ वाञ्छा, तदा मेऽधरे संस्फुरेन्मन्दहासः ॥ ५ ॥

एवं सकललोकस्पृहणीयं हास्यं 'स्मित-हास-विहासावहासापहासातिहास'—रूपेण षोढात्वं प्राप्य हासस्थायिभाव-हसनीयपात्रालम्बन-तदीयचेष्टोद्दीपनताभिश्च रसत्वं प्राप्नोति । हास्यरसस्य चावैदिककालादद्य यावत् प्रवृत्तिः परिपोषं प्राप्ता प्रतीयते । काव्येषु नाटकेषु कथानकेषु वा सर्वत्र यथावसरं कवयो हास्येन स्वीया रचना अभूषयन्निति नास्त्यत्र कश्चन संशीतिलेशः । अत एवेमां लोकम्पृणां प्रवृत्तिमादृत्य समग्रामपि कृतिं हास्यप्रधानां विरचयितुकामाः कवयः कामं प्रहसन-काव्यानि प्रहसन-रूपकाणि च निर्मातुं प्रावर्तन्तेत्यपि विचारसहमेव । अद्यैषा परम्परा नितरां विकास-शालिनी दृश्यते । बहूनि प्रहसनकाव्यानि प्रकाशितानि प्रकाश्यन्ते च । एवमेव प्रहसन-रूपकाण्यपि न न्यूनानि सन्तीति दर्शयितुं मनाग् विचारोऽग्रे प्रस्तूयते ।

संस्कृत-साहित्ये 'प्रहसन'-परम्परा

रूपकभेदेषु स्वीकृतस्यैकतमभेदस्य 'प्रहसन'स्य विरचन-परम्परा कुतः प्रवृत्तेति विज्ञातुं वयं समुपलब्धग्रन्थानेवाधारीकृत्य किमपि निश्चेतुं प्रभवामः । अनया दृष्ट्या प्राप्तानां प्रहसनानां कालक्रमेण विमर्श इत्थं विद्यते—

१. दामक-प्रहसनम्—महाकविर्भासः (ईशवीयप्रथमशत्याः पूर्वम्)

महाकवेर्भासस्य नाटकचक्रं सुपरिचितम् । आद्यनाटककर्तृत्वेनाप्यस्य कवेः स्वीकृतिः । प्रस्तुतस्य प्रहसनस्य त्रीणि पृष्ठानि प्राप्तानि । लघीयस्या अस्या रचनाया भासकर्तृत्वं श्रीरामकृष्णकविप्रभृतयः स्वीकुर्वन्ति परमन्ये लेखकनाम-समयसूचनादीन् विना तथा न मन्यन्ते । तथापि रचनायामस्यां महाभारतकथाविषय-वर्णन-कतिपय-शब्दादीनां साम्याधारेण भासस्यैवेदं प्रहसनमिति मन्वत आलोचकाः ।

अस्मिन् प्रहसने त्रिलोकविजयित्वं वाञ्छन् कर्णः परशुरामाश्रमे विद्याप्राप्तये गच्छति । ब्राह्मणत्वञ्च स्वस्या प्रकटय्य विद्यां प्राप्नोति । परमेकदा तस्य सहनशक्तिं दृष्ट्वा क्षत्रियोऽयमिति ज्ञात्वा तस्मै परशुरामेण शापः प्रदत्तः । दामकोऽत्र कर्णस्य सखा । दुर्मुख-दुर्बुद्धिनामकपात्रद्वयं स्वीये संल्लापे दुर्बुद्धिमाध्यमेन रहस्यमिदमेवं वर्णयति—

कृत्तो वज्रमुखेन नाम कृमिणा दैवात्तदूरुद्वये,
निद्राच्छेदभयादसह्यत गुरोर्धैर्यात् तदा वेदना ।

उत्थाय क्षतजानुतः स सहसा रोषानलोद्दीपितो,
बुद्ध्वा तं च शशाप कालविफलान्यस्त्राणि ते सन्त्विति ॥

अथ च भारतस्य तात्कालिकी तपोवनानां स्थितिरप्यत्र प्रसङ्गतो वर्णिताऽस्ति। यथा—

(परिक्रम्याश्रममवलोक्य)

भोः ! सर्वजनसाधारणमाश्रमपदं नाम। सन्तुष्टतपस्विजनोऽयमाश्रमाभोगः। अत्र खलु चीरवल्कलवसनाः, चित्रजटापुञ्जपिञ्जरितोत्तमाङ्गाः कृष्णत्वचं ग्रन्थिमतीं दधाना आश्रमवासिनः संयमिनः समित्कुशकुसुमादीनि स्वैरं वनादुपनयन्ति। अत्र केचित् सलिलमवगाढा मुनिजनाः। अत्र हि प्रदीप्तोऽग्निर्भाति वैश्वदेवसम्भूतश्च धूमः प्रविचरति मुनिवनम्।[1]

अत्र सूत्रधार-नट्योर्हास्यमयो वार्तालापस्तथाऽङ्गराजस्य कर्णस्य दामकनाम्नः सख्युर्मधुरं हास्यमिश्रं सम्भाषणं प्रहसनस्य परिपाटीमाटीकते। तथा भासस्यैव कर्णभारस्य कानिचिद् वाक्यान्यप्यत्र मिलन्ति। यद्यप्यत्र भासस्यान्यनाटकानामिव सौन्दर्यं नास्ति तथाप्यस्य प्राथमिकरचनारूपेण परिगणना नास्त्युपेक्षणीया।

२. मत्तविलासः — श्रीमहेन्द्रविक्रमवर्मा (ई० सप्तमशतकस्य पूर्वार्धः)

पल्लववंशीयस्य शत्रुमल्ल – गुणभर-अवनिभाजनादिविरुदभूषितस्य महेन्द्रविक्रमस्येयं रचना कापालिक- शाक्यभिक्षु-पाशुपतयोर्मिथः सङ्घर्षमतीव संयतरूपेण वर्णयति। अत्र मधुपानमत्तयोर्युवति-कापालिकयोर्हस्तात् कश्चन श्वा कपालभाजनमाहृत्य पलायते। अन्यस्य शाक्यभिक्षोर्हस्ते तादृशमेवान्यत् कपालभाजनं दृष्ट्वा तं चौरं मत्वातौ योद्धुं प्रावर्तताम्। तेन सह विवादस्तथा निर्णयाय पशुपतेराश्रमे गमनमित्याद्यत्र साधु वर्णितम्। चरित्र-चित्रण-दृष्ट्याऽत्र कापालिकः सुरापानं स्त्रीसङ्गमं च मोक्षद्वारमिव मनुते। दुःखस्वरूपस्य मोक्षस्योपहासाय च जिनं भगवन्तं मिथ्यादृष्टिरिति सम्बोध्योपहसत्यपि—

कार्यस्य निःसंशयमात्महेतोः, सरूपतां हेतुभिरभ्युपेत्य।
दुःखस्य कार्यं सुखमामनन्तः, स्वेनैव वाक्येन हता वराकाः ॥८॥

कापालिक एतेषां नामग्रहणादपवित्रितां जिह्वां सुरया प्रक्षालनेच्छां प्रकटय्य जैनतीर्थङ्कराणामाचारपद्धतिमप्याक्षिपति। पाशुपतः परस्परं विवदमानयोः

---

१. दामक-प्रहसनोक्तमिदं वर्णनं स्वप्नवासवदत्तनाटकस्य—
खगा वासोपेताः सलिलवमगाढो मुनिजनः’ इत्यादि पद्येन साम्यं धारयति।

कापालिकयोः कपालावाप्त्या प्रीतिं सम्पाद्य जीवन-सन्देशमेवं ददाति—

विरोधः पूर्णसम्बन्धो युवयोरस्तु शाश्वतः ।
परस्पर-प्रीतिकरः किरातार्जुनयोरिव ॥

कापालिकस्य भार्या देवसोमाऽत्र पतिव्रतपरायणा दृश्यते । सा च तस्य सर्वेष्वपि कर्मसु सहायिका भवति । संस्कृतनाट्यपरम्परानुसारमत्र नान्दी भरतवाक्यं चापि वर्तेते । शिवस्तुतौ वर्णितं पद्यमिदं हास्यमिश्रमतीव प्रियमिव प्रतिभाति—

पेया सुरा प्रियतमामुखमीक्षितव्यं,
ग्राह्यः **स्वभावललितो विकृतश्च वेषः ।**
येनेदमीदृशमदृश्यत मोक्षवर्त्म,
दीर्घायुरस्तु भगवान् स पिनाकपाणिः ॥

अस्यां कृतौ विविधानां प्राकृतानामप्युपयोगः श्लाघनीयः ।

३. लटक-मेलक-प्रहसनम् — शङ्खधरकविराजः (१२०० ई०)

स्वसमयस्य विषाक्तेन वातावरणेनाच्छन्नं समाजं शोधयितुमेव प्रसिद्धस्यास्य प्रहसनस्य निर्माणमभूत् । कविराजोऽयमात्मानं कन्नौजभूपतेर्गोविन्दचन्द्रस्य समसामयिकमभिव्यनक्ति ।[1] किञ्च स्वीयं परिचयमप्यत्रैवं निर्दिशति—

चित्रं चरित्रं स्खलितव्रतानां शीलाकरः शङ्खधरस्तनोति ।
विद्वज्जनानां विनयानुवर्ती धात्रीपवित्रीकरणः कवीन्द्रः ॥१।६॥

द्वयोरङ्कयोरस्य प्रहसनस्य संयोजने मदनमञ्जर्याः कुट्टिनी दन्तुरा, आचार्यः सभासलिः, शिष्यः कुलव्याधिः, शिष्यपत्नी कलहप्रिया, दिगम्बरो जटासुरः, अज्ञानराशिः, मिथ्याराशिः, संग्रामविसरः, झकटसारः, मिथ्याशुक्लः कुक्कुटमिश्रश्चेत्यादिपात्राणामाश्रयः सर्वथा प्रमोदावहः सम्पन्नः । अत्र विनोदाय 'जन्तुकेतु'नामा वैद्यो दन्तुरायाः कुक्कुरदष्टाया उपचाराय समाहूतः । स चात्मनो विशेषज्ञतामेवं प्रकटयति—

व्याधयो मदुपचारलालिता मत्प्रयुक्तममृतं विषं भवेत् ।
किं यमेन सरुजां किमौषधैर्जीवहन्तरि पुरः स्थिते मयि ॥ १.२२ ॥

लटकशब्दस्यार्थो धूर्त इत्यस्ति । धूर्तानां मेलकरूपेणात्र तेषां क्रियाकलापानां विस्तृतं विवरणं प्रस्तुतम् । शङ्खधरस्याभिमतं किल शास्त्रीयाणां षड्विधहास्यानां प्रयोगमाध्यमेन वातावरणस्य निर्माणमासीत् । यथा—

---

१. लटकमेलके-३ । पञ्चमे पृष्ठे

यस्य कस्य तरोर्मूलं, येन केनापि पेषयेत् ।
यस्मै कस्मै प्रदातव्यं यद्वा तद्वा भविष्यति ॥२३॥ इत्यादि

संकल्पितस्योद्देश्यस्य पूर्तौ कविरयं सर्वथा साफल्यमप्यवाप्तवान् । अत्र प्रहसने धूर्तानां निखिलोऽपि कार्यक्रमो दन्तुरानाम्न्याः कुट्टिन्या गृह एव सम्पद्यते । यत्र तत्र गीतायाः पद्यानां प्रमाणरूपेण विन्यासोऽपि विनोदायैव । किञ्च—

सभापतिः—दन्तुरे, त्वद्गुणाकृष्टोऽयं दिगम्बरस्त्वामभिलषति । त्वं चाद्यापि नवनवतिवर्षदेशीया युवतिः ।

तथा हि—

निबिडितनूपुर-मधुराः कस्य निगूढा न सन्ति ते निधयः ।
रिपुरिव यदि न विसर्पति करकिसलयवलयझङ्कारः ॥ २ ॥ पृ. ४७

इत्यनुसारं दन्तुराया विवाहमाधारीकृत्य प्रहसनस्यास्य **'दन्तुरा-परिणयः'** इत्यपि द्वितीयं नाम कथ्यते । बहुत्र 'नटक-मेलकम्' इत्यपि नाम सूच्यते ।

अस्य कवेर्वाग्गुम्फनमतीव मनोरमं विद्यते । यथा प्रारम्भे शिवस्तुतौ—

गौरीचुम्बनचञ्चलाञ्चलवलच्चन्द्रप्रभा-मण्डल—
व्यावल्गत्फणिकुण्डलं रतिरसप्रस्विन्नगण्डस्थलम् ।
प्रौढप्रेमपरम्परा-परिचय-प्रोत्फुल्ल-नेत्राञ्चलं,
शम्भोरस्तु विभूतये त्रिजगतामुन्मत्तगङ्गं शिरः ॥ १ ॥

४. भगवज्जुकीयम् — बौधायनः (११ तमशतकम्)

अस्य रचनाकारो बौधायनः सांख्य-योगदर्शनस्य प्रौढं पाण्डित्यं धारयति स्म । अत्र कश्चन शाण्डिल्यनामा ब्राह्मणबटुर्भोजनादिसौविध्यप्राप्तिकामनया बौद्धभिक्षुरभवत् । परं कालान्तरेण तत्र नियमानां काठिन्यं विलोक्य कस्यापि परिव्राजकाचार्यस्य शिष्यतामगृह्णात् । तत्रापि गुरोः स्वार्थवृत्तिं वीक्ष्य स खिन्न-खिन्न आसीत् । एकदा स गुरुमपृच्छत् तदा गुरुणोत्तरितम्—

अमानकामः सहितव्यमर्षणः कृशाज्जनाद् भैक्षकृतान्नधारणः ।
चरामि दोषव्यसनोत्तरं जगद् ध्रुवं बहुग्राहमिव प्रवादवान् ॥४॥

इति श्रुत्वा तेन सत्यमिदं प्रकटितं यदहं तु केवलं भोजनसौविध्याय भवतां शिष्यत्वं स्वीकृतवानस्मि । नास्ति मम धर्मकर्मभिः सम्बन्धः । ततः परं गुरूक्तं पालयितुं वाञ्छति तदा स ततो लाभं पृच्छति । गुरुणा यौगिकैश्वर्यलाभो भविष्यतीत्युत्तरितम्, स च तदैश्वर्यं साक्षात्कर्तुं प्रार्थयते । तदाऽशोकवने गणिकामेकामागतवतीं सर्पदंशनेन मृतां ज्ञात्वा गुरुणा स्वं योगमहिमानं प्रकटयितुं तस्यां स्वकीयाः प्राणाः प्रवेशिताः ।

गणिका जीविता । परं सा परिव्राजकवदेव व्यवहरति स्म । तदनुरूपमेव सा शाण्डिल्यं स्नानं विना स्वस्याः स्पर्शं निषेधितवती । अनेन व्यवहारेण च विस्मितः स शाण्डिल्यो गुरुं प्रति गच्छति तदा गुरुर्व्यवहारशून्यः शव एवाभूत् । तथा दृष्ट्वा स चिन्तितः कथयति—"किं बहुज्ञा अपि म्रियन्ते ?" ततः परं वैद्य आकार्यते, सोऽपि तद् दृष्ट्वा विस्मयं गच्छति । तदनु यमदूताः परस्या वसन्तसेनाया आयुःपूर्तिरभूदस्या नवेति ज्ञात्वा तां जीवयितुमायाताः परं तां तथाविधां वीक्ष्य ज्ञात्वा च तदीयान् प्राणान् आचार्ये संयोजयन्ति । गुरुरपि वसन्तसेनावद् हावभावान् प्रकटयति रामिलकं चाहूय शृङ्गारवार्तामाचरति । एवं स्थितौ यमदूता भूयोऽप्यागत्य वसन्तसेनास्थितानाचार्यप्राणान् प्रार्थयन्ते तदा शरीरविनिमययोगेनाचार्यास्तथा कुर्वन्ति सर्वे च प्रसन्ना भवन्ति ।

अस्य कवेर्विषये यद्यपि केचन विवादाः सन्ति, तथापि प्रहसनस्यास्य टीकायां 'बोधायन'स्य नाम निर्देशादयमेवास्य कर्तेति मन्यते ।[1] अयं हि नाट्यशास्त्रस्यापि विशेषज्ञ आसीत् । अनेन प्रस्तावनायां रचयितुर्नाम न दत्त्वा सूत्रधारमुखेनैकस्य प्रहसनस्याभिनयसम्बन्धिनी सूचना दत्ता । किञ्च तत्रैव रूपकभेदानां पुष्पिकायां नाटक-प्रकरणादिभेदैः सह 'वार-सल्लाप' योरपि नामनी पुरस्कृते ।

दार्शनिकविवेचनाधिक्येन क्वचिद् गूढत्वमप्यायातं परं हास्यप्रधानतया नीरसत्वं न प्रतीयते । यथा—

सुखेषु दुःखेषु च नित्यतुल्यतां, भयेषु हर्षेषु च नीतिरिक्तताम् ।
सुहृत्स्वमित्रेषु च भावतुल्यतां, वदन्ति तां तत्त्वविदो ह्यसङ्गताम् ।।

अस्मिन् प्रहसने द्वौ भागौ कथायाः स्तस्तत्र प्रथमे गुरुशिष्ययोः संवादस्तथा द्वितीये गणिका-प्रसङ्गे शिष्य-वैद्य-यमदूतादीनां संवादाः । एतेषु हास्यं परां कोटिं पुष्णाति । भावानुसारिणी भाषा, रङ्गमञ्चीयकार्याणामभिनयस्तथा नाट्योचिता शैली सर्वत्र व्याप्ताऽस्ति । अत एवेदं प्रहसनं सर्वैर्नाट्यविद्यानिपुणैः पूर्णं प्रशंसितं विद्यते ।

५.हास्य-चूडामणिः — वत्सराजः (१२ शत्या उत्तरार्धः)

कालिञ्जराधीश-परमर्द्दिदेवस्य महामात्यश्रीवत्सराजस्य[2] षट्सु रूपकेषु हास्यरसात्मिकेयं रचनैकाङ्कशालिनी विद्यते । अत्र भागवतसम्प्रदायस्य ज्ञानराशिनाम्न

---

१. बोधायनकविरचिते विख्यात-भगवदज्जुकाभिहिते ।
अभिनेयेतिगभीरे विशदानमुना करोमि गूढार्थान् ।। १ ।।

२. अयं कविर्यथा संस्कृतनाट्यकारस्तथैव युद्धे कृपाणधारकोऽप्यासीत्, इति प्रसिद्धिः ।

आचार्यस्य परिहासः कृतः। स केवलिविद्याया ज्ञाताऽस्तीतिरूपेण दम्भं धारयति। विद्याया अस्याः प्रभावेण च गुप्त-तिरोहित-नष्टवस्तूनां तथा भूमिगतद्रव्यस्य च ज्ञानं कर्तुं प्रभवति। अतो विभिन्नैः प्रकारैश्छलप्रभृतिभिर्मूर्खतापूर्णाभिः क्रियाभिश्च स्वीयं व्यवसायं चालयति। तस्य दुर्निग्रहः कौण्डिन्यनामकः शिष्योऽस्ति स च स्वगुरौ मनागपि न श्रद्धत्ते। गुरोरुक्तीनां शब्दशो व्याख्याः सम्पाद्य च स मोदते। अत्र वेश्या-चेट--धूर्तादीनां वेशभाषाचेष्टा वर्णिताः सन्ति, अतः शास्त्रीयदृष्ट्येदं सङ्कीर्ण-प्रहसनकोटावागच्छति।

नीलकण्ठयात्राया अवसरे सामाजिकानामनुरञ्जनाय तदानीन्तनसमाजस्य च पाखण्डविस्फोटनायास्य निर्माणमभूत्। कवे रचनासौष्ठवं दर्शनीयं विद्यते। नेपथ्ये प्रावेशिकीध्रुवायामम्बरलक्ष्म्या वर्णनं यथा—

> पत्तुं णिअसंपत्ति परिमुसिअं विसमतिमिरचोरेण।
> एसा अंबरलच्छी भअवंतं सूरमणुसरदि ॥१॥

केवलिविदां प्रथमाचारं शिक्षयन् ज्ञानराशिः कौण्डिन्यं बोधयति—

> किं वाग्भिर्निकषो हि नः फलमिति स्याद् गूढगर्वग्रहः,
> प्रश्नस्याखिलमुत्तरं विरचयेन्न व्याहरेन्निर्णयम्।
> सिद्धं कार्यमवेक्ष्य निश्चितमिदं पूर्वं मयासीदिति,
> स्फारं स्फारमुदीरयेदुपचरेत् कञ्चिन् मृषा साक्षिणम् ॥१।१६॥

दाम्भिकानां स्थितिश्चात्रैवं वर्णिता।

> न जानामि न गृह्णामि मम किं चिन्तयाऽनया।
> अनङ्गीकार एवायं दाम्भिकानां महाफलः ॥२।२२॥

वत्सराजस्यास्यां कृतौ सूत्रधार-पारिपार्श्वक-ज्ञानराशि-कौण्डिन्य-कलाकरण्ड-क-पारावत-कोकिल-मुद्गरकनामानोऽष्टौ पुरुषपात्राणि तथा मदनसुन्दरी—कपटकेलि-कुसुमिकाश्चेति तिस्रः स्त्रियः पात्रत्वं बिभ्रति। पात्रानुसारिवर्णनेन प्रहसनमिदं नितरां श्लाघनीयं संवृत्तम्। परिहासाय पद्येष्वक्षरपरिवर्तनविधाऽप्यत्र स्वीकृता। यथा—

> आलोक्य सर्वशास्त्राणि विचार्य च पुनः पुनः।
> इदमेकं तु निष्पन्नं ध्येयो नारायणः सदा ॥ इति पद्यं कौण्डिन्यः
>
> आलोक्य सर्वगात्राणि विचार्य च पुनः पुनः।
> इदमेकं तु निष्पन्नं ध्येयो नारीजनः सदा ॥ १२॥ इति पठति।

एवमेव वृद्धायाः कपटकेलेस्तारुण्याभिनयं ज्ञानराशिरेवं वर्णयति—

वातोत्फुल्लतया नयन्ति समतां निम्नौ कपोलौ मुहु—
स्तुङ्गत्वाभिनयं वहन्ति कुचयोर्वक्षःस्थलोल्लासनैः ।
पुत्रीभ्योऽपि कनिष्ठतां प्रकटयन्त्याच्छाद्य केशान् सितान्—
स्तारुण्याभिनयग्रहः परिणतौ कोऽप्येष दुर्योषिताम् ॥ २ । ६॥

अथ च कपटकेलिरपि तं भागवतानां रहस्यं बोधयन्ती कथयति—

भाग्यवान् कुरुते नित्यं यः कन्दर्पनिषेवणम् ।
सुतरां प्रीयते तस्य कन्दर्पजनको हरिः ॥ २। ६ ॥ इत्यादि ।

६-१२. साहित्यग्रन्थेषु नामतो निर्दिष्टानि सप्त प्रहसनानि—

नाट्यशास्त्रविवेचकेषु ग्रन्थेषु मुख्यरूपेण शारदातनयस्य (१२५० ई०) 'भावप्रकाशने' प्रहसनस्योदाहरणप्रसङ्गेन त्रीणि प्रहसनानि नाम्ना निर्दिष्टानि विद्यन्ते-तानि च क्रमशः—१-'सैरन्ध्रिका २-सागर-कौमुदी ३-कलिकेलि (शशिकला) श्चेतिसन्ति । सिंह (शिंग)भूपालस्य (१४ शती) 'रसार्णव-सुधाकरे'ऽपि द्वयोः प्रहसनयोरुदाहरणरूपेण निर्देशो विद्यते, ते च—१-आनन्दकोशः २-बृहत्साभद्रकं च स्तः ।

अस्यामेव शत्यां विश्वनाथ-विरचिते 'साहित्य-दर्पणे, च'-१-कन्दर्पकेलिः २-धूर्तचरितं चेति द्वे प्रहसने नाम्नोदाहृते विद्येते ।

एवमेतेषां सप्तानामपि प्रहसनानां कुत्रापि साम्प्रतं पाण्डुलिपयो न लभ्यन्तेऽतो नामभिरेव स्मरणमधुनाऽऽस्मशेषम् ।

१३. हास्यार्णवः — श्रीजगदीश्वरभट्टाचार्यः (अज्ञातकालः)[1]

प्रहसनेऽस्मिन् कविना 'अनन्यसिन्धु'नृपतेः कथा वर्णिता । यः किल भोगलिप्सावशात् स्वीयं राजकार्यं सञ्चालयितुं शिथिलो भवति । स कदाचिद् अयथार्थवादिनमात्मनं स्वीयं चरं राजकर्मणो गतिविधिं ज्ञातुं प्रेषयति, चरश्च तद्ज्ञात्वा सूचयति यद् राज्ये भवतां स्वेच्छाचारितया जनता दुर्वृत्तं परिहाय सुवृत्तेन जीवनं यापयति । एतद् श्रुत्वा कुपितो नृपो नागरिकान् दण्डयितुं चेष्टते । यथा—

चरः (संस्कृतमाश्रित्य)
आलिङ्गन्ति निजाङ्गनां परवधूं हित्वा जनाः साम्प्रतं,
नीचः सीव्यति सत्युपानहमहो सद्ब्राह्मणानां गणे ।

१. रचनाया वर्ण्यविषयस्य चाधारेणैवात्रास्य प्रहसनस्य समावेशो विहितः ।

वन्दन्ते द्विजमन्त्यजे निवसति व्रीडाविहीना जना,
एवं मण्डलवैपरीत्यमधिकं जातं महाभूपते ! ॥१।११॥
अपि च—नारीणां नयनेऽञ्जनं न जघने सिन्दूरभामण्डिते,
सीमन्ते न च नूपुरौ पदयुगे यावोऽपि नैवेक्षणे।
वक्षोजे मणिमञ्जरी न चरणे काञ्ची कटौ नाधरे,
चेत्थं वेषविपर्ययः प्रतिगृहं दृष्टः सकष्टं यथा ॥१।१२॥

एवं रागाधिक्येन च पुरा यादृशं वैपरीत्यमासीत् तथा नाधुनेत्येव राज्ञः कोपकारणं तच्च हास्यजनकमेव। दण्डव्यवस्थायै राजा कुमतिवर्मणाऽमात्येन सह मन्त्रयति मन्त्रणानुसारं चामात्यो बन्धुरा नाम्न्याः कुट्टिन्या गृहे कार्यालय स्थापयति कुट्टिनी च स्वपुत्रीं मृगाङ्कलेखां राज्ञेऽर्पयति। मृगाङ्कलेखायाः कामशास्त्राध्यापकः किल महामहोपाध्यायः श्रीविश्वभण्डः। तच्छिष्यश्च कलहाङ्कुरः। विश्वभण्ड प्रणतवते राज्ञे कलहाङ्कुरस्याशीरियं द्रष्टव्या—

शत्रोर्वृद्धिर्भयो वृद्धिर्वृद्धिर्व्याधेर्ऋणस्य च।
दुर्गतेर्दुर्मते वृद्धिः सन्तु ते सप्तऋद्धयः ॥१।२१॥

विलासिनृपाणां जीवने व्यङ्ग्यं विधातुकामेन कविनाऽस्य प्रणयनं कृतम्। अत्र चिकित्सक आतुरान्तकपुत्रो व्याधिसिन्धुः, रक्तकल्लोलनामा नापितः, मिथ्यार्णवो ब्राह्मणः, महायान्त्रिको ज्योतिषी च यथायथं विनोदवर्धकानि कार्याणि कुर्वन्ति। यत्र तत्र प्राकृतिकं वर्णनमपि रुचिरं विद्यते। भाषासौष्ठवेन रचना सरला सरसा च सम्पन्ना।

१४. कौतुक-सर्वस्वम् — गोपीनाथचक्रवर्ती (अज्ञातः कालः)

दुर्गोत्सवमभिलक्ष्य विरचितमिदं प्रहसनं गोपीनाथस्य मनोरञ्जकतत्त्वप्रधानं रूपकं विद्यते। अत्र 'भङ्गाप्रियो लम्पटः सर्वथा दुर्व्यसनो राजा कलिवत्सलः पुण्यात्मानं विप्रं सदाचारं प्रति दुर्व्यवहरति। विप्रश्च राज्ये सर्वत्र व्याप्तां विकृतिं विप्लुतिं च पश्यति। जनाः परपीडने क्रूरतां, मिथ्याकथने कौशलं धर्मशीलेषु घृणा-दर्शनमेव सज्जनत्वं मन्वते। खड्गेन नवनीतपिण्डकर्तनं मशकं दृष्ट्वा च भयेनोत्कम्पनं सेनापतेः शौर्यं प्रकटयतः। पुराणेषु वर्णितानामनैतिकतानां परिहासं विधातुमत्रोक्तं यद् ऋषिभिस्तासामेव चर्याणां निषेधः कृतो याः किल वार्धक्यकारणात् तेषामुपभोगाय न कल्पन्ते स्म। राजा स्वच्छन्दप्रेम्णो घोषणां करोति परं स स्वयं गणिका-विषयके कस्मिन्नपि विवादे व्यस्तस्तिष्ठति। राजा गणिकायाः प्रसन्नतायै विवशः सन् ब्राह्मणान् स्वराज्याद् निःसारयति।

एवं विनोदप्रधानानि वर्णनानि प्रस्तूय कविः स्वां कृतिं यथाशास्त्रं पुरस्कृतवान्।

१५. धूर्तसमागमः —ज्योतिरीश्वरठक्कुरः (१४ शत्या आरम्भः)

मिथिलानरेश-हरिसिंहदेवस्य राजकविः श्रीज्योतिरीश्वरो 'वर्णनरत्नाकर'-(मैथिलभाषायां)स्य तथा 'पञ्चसायक'नाम्नः कामतन्त्रग्रन्थस्य निर्मातृत्वेन प्रसिद्धः। एवं मन्यते यद् नेपालवासिभिर्नाट्यकलायाः साहित्यिकं रूपमेतस्मादेव गृहीतम्। धूर्तसमागमस्य प्रस्तावनायां मिथिलानरेशस्य तथा तुगलकवंशस्य यवन-नृपतेर्गयासुद्दीनस्य युद्धं प्रति सङ्केतो लभ्यते। तत्रैव कविः स्वकीयां वंशावलीमपि वर्णयति। तदनुसारमयं रामेश्वरस्य पौत्रस्तथा धनेश्वरस्य पुत्र आसीत्।

धूर्तसमागमे कश्चन दुष्टपरिव्राजको विश्वनगरस्तच्छिष्यश्च दुराचार एकस्या वेश्याया अनङ्गसेनायाः कृते कलहं कुरुतः। अनङ्गसेनया पूर्वं शिष्योऽमिलत् परं गुरुस्तां कामयते स्म। ततस्तन्निर्णयाय युवत्याः परामर्शानुसारं सज्जातिनामा ब्राह्मणो वृतः। यो हि वानरस्य तथा द्वयोर्बिडालयोर्युद्धस्य कथानुसारं कलहस्यास्य निर्णयं कुर्वन् वेश्यां स्वस्मै संरक्षति। लटकमेलक-हास्यार्णवादिप्रहसनवदेवात्रापि प्रारम्भादन्तं यावच्छृङ्गारस्य प्रचुरः प्रयोग आदृतः।

१६. कौतुक-रत्नाकरः — (अज्ञातनामा) कवितार्किकः (१६ शती)

अस्य प्रहसनस्य कविर्बङ्गभुवो) वाणीनाथस्य पुत्रः कवितार्किकोपाधिधारी (सम्भवतो नोआखालीस्थो लक्ष्मणमाणिक्यो विद्यते। अस्मिन् पुण्यवर्जितनगरस्य दुरितार्णव-नाम्नो मूर्खनृपस्य परिहासो विहितः। अनेन राज्ञा स्वस्य दुष्टैरपहृताया राज्ञ्या गवेषणाकार्यं धूर्तेभ्योऽर्पितमासीत्। राज्ञी चारक्षिदलस्य प्रधानकर्मचारिणः सुशीलान्तकस्य निकटे सुरक्षिताऽभूत्। राजा सर्वाणि कार्याणि मन्त्रिणः कुमतिपुञ्जस्य पुरोहितस्याचारकालकूटस्य, ज्योतिर्विदोऽशुभचिन्तनस्यान्तःपुरस्य प्रहरिणः प्रचण्डशेफस्य तथा गुरोरजितेन्द्रियस्य सम्मतिभिः करोति स्म। वसन्तोत्सवस्य दिने राजाऽनङ्गतरङ्गिणीनाम्नीं गणिकां राज्ञ्याः स्थाने स्वीकरोति तदैव कपटवेशधारी नामा धूर्तो ब्राह्मणो राज्ञ्या हर्तृरूपेण प्रकटीभवति। अन्यैः प्रहसनैरिवात्राप्याचार-विचारा उत्तर-प्रत्युत्तराणि किञ्चिदतिशयोक्तिपूर्णानि सन्त्यतः प्रहसनं नात्युत्तमां कोटिमावहति।

१७. धूर्तनर्तकम् --श्रीसामराजदीक्षितः (१६२५-१७०० ई०)

बुन्देलखण्डीय- 'आनन्दराय'भूपतेः सभापण्डित-श्रीनरहरिदीक्षितसूनोः श्री-सामराजदीक्षितस्येदं प्रहसनं द्वयोः सन्ध्योर्विभक्तं सदेकाङ्केन "धूर्तानां चरित्रं" वर्ण-यति। अत्र शैवानामवधूतानामुपहासो वर्णितः। पात्राणां षोडश्यामत्र मुढेश्वरजग-द्वञ्चक-मुख्य-प्रज्ञानन्दस्वामि-नाग-गुण्ठाचार्यादयो वसन्तलतिकावेश्यायाः प्रीति-माध्यमेनोपस्थीयन्ते।

अस्यां कृतौ शिष्टानुमोदितान्येव चित्राणि प्रस्तुतानि । साहित्यिकदृष्ट्याऽतीव मनोहारिणी रचनेयम् ।[1]

१८. (क) अद्भुत-तरङ्ग-प्रहसनम्— श्रीहरिजीवनमिश्रः (१६३५-१६८९ ई०)

राजस्थानस्य 'आम्बेर' (आमेर ?)[2] भागे श्रीरामसिंहभूपती राज्यमकरोत् । तस्य राजसभायां 'हरिजीवनमिश्रः' कश्चन गौड-ब्राह्मणः पण्डितवर्य आसीत् । अस्य पितामहः श्रीवैद्यनाथमिश्रस्तथा जनकः श्रीलालमिश्र आस्तामिति प्रस्तुतस्य प्रहसनस्यान्त्यपुष्पिकायां स्वयमेव कविवरेणानेन सूचितम् । यथा—

"इति श्रीसार्वभौम-महाराजाधिराजश्रीमानसिंहवंशश्रीमहाराज-जयसिंह-पुत्र-सकलविद्यारसिकश्रीमहाराजाधिराजश्रीरामसिंहाज्ञयाहिरण्यगर्भगौड-सकलविद्याविशारद-श्रीवैद्यनाथमिश्रपुत्र-पण्डितमण्डल श्रीलालमिश्रात्मज-हरिजीवनमिश्रेण विरचिते 'अद्भुत-तरङ्ग' नाम्नि प्रहसने मन्दहासस्तृतीयोऽङ्कः समाप्तः ।"

अनेन कविना षड् प्रहसनानि निर्मितानि । तेष्विदमाद्यं प्रहसनमस्ति । अनेनैव "विजयपारिजातम्' 'प्रभावती' चेति द्वे नाटिके अपि विरचिते ।

प्रस्तुते प्रहसने त्रयोऽङ्काः सन्ति प्रत्यङ्कं च कस्याप्यद्भुतस्य वस्तुनः सङ्घटना विद्यते । अत एवास्याभिधानम्-'अद्भुततरङ्ग'मिति । प्रथमे तरङ्गे गौडरसमिश्रनामा वैष्णवो मदनाङ्गविक्रमस्य राज्ञः सभायां प्रविश्य तस्मै कपटपूर्वकमाशीर्वादं ददाति । असमये तादृशमाशीर्वादं श्रुत्वा राजा तं दण्डयितुं विधवाविध्वंसकमिति नाम्ना ख्यातं धर्मशास्त्रवेत्तारमाह्वयति । स च धर्मपुस्तकं दृष्ट्वा कथयति 'यदहमर्शो-व्याधिना पीडितोऽस्मि, तस्माद् मम भार्यायाः सन्तुष्ट्या अयं कामाग्निकुण्डे पातनीय इति ।' स्वधर्माधिकारिण ईदृशीमवस्थां विज्ञाय राजा यमानुजं नाम राजवैद्यमाहूय तमपि दण्डयितुमादिशति । विधवाविध्वंसकस्तद्विषयेऽपि तमेव दण्डं वदति । दण्ड-विधानस्य पूर्तये 'रामार्चनचन्द्रिका' नाम्नी वेश्याऽऽहूता । विधवाविध्वंसकस्य भार्याप्याहूता, परं तस्याः स्थाने तदीयभार्याया वेषेण जम्भको नाम विदूषकः प्राविशत् । अन्ते च सर्वविधं रहस्यमुद्घाटितं भवति ।

द्वितीयतरङ्गे कतिपयानां निम्नकोटिकपात्राणां गतिविधयो वर्तन्ते । तृतीये च तरङ्गे वैष्णवसम्प्रदायानुयायिनामाचरणमधिकृत्य व्यङ्ग्य-परिहासादयो व्याहृताः ।

---

१. अस्य विस्तृतः परिचयोऽस्य लेखस्यान्त्यभागे सन्नद्धो वर्तते ।

२. इदं स्थानं जयपुरनगरस्य निकटे 'आमेर का किला' इति नाम्ना सम्प्रति ज्ञायते ।

रचनादृष्ट्याऽत्र शृङ्गाररसस्य प्राधान्यं विद्यते। विधवाविध्वंसकस्य पत्न्या वर्णनं यथा—

> किं भूमौ प्रतिबिम्बितो हिमकरो नक्षत्रमालावृतो,
> ज्योत्स्नासाररसायनं किमथवा कामस्य पुण्योदयः।
> किं वा कामिजनानुरागनिभृतव्यालोलनेत्राञ्चल=
> प्रद्योतोपमितस्तमः प्रचरति प्रायः सुधानिर्मितः॥

अन्यत्र 'वारवधूष्वेव सर्वे रसा वर्तन्त' इति विशदयता कविना कथितम्—

> तासां सात्त्विकभावतः प्रकटिता शृङ्गारहारावलि—
> वीरः प्रोत्सहनोत्सवैश्च करुणा मूर्च्छाविधौ सम्भृतः।
> हास्यं तस्करचालनेषु विदितं मुग्धासु भीतिः परं,
> क्रोधोऽन्योन्यजनेऽद्भुतः प्रमुदितः सर्वत्र लोकोत्तरः॥

१९. (ख) प्रासङ्गिक-प्रहसनम् — [कर्ता पूर्वोक्त एव]

श्रीहरिजीवनमिश्रस्य द्वितीयमिदं प्रहसनम्। अस्य प्रधानपात्रं प्रकृष्टदेवस्तथा नायिका प्रकृतिप्रिया तदीया पत्नी। प्रहसनस्यास्य कथानके हास्योत्पादनार्थं निम्नकोटिकानां पात्राणां कार्यकलापा वर्णिताः। पात्राणि प्र-वर्णस्य प्रयोगान् बाहुल्येन विदधति। अत्र राजा प्रताप-पङ्क्तिस्तस्य नर्मसचिवः प्रेरको विदूषकोऽन्ये च सर्वेऽपि प्रपूर्वकानेव पदानि प्रयुञ्जन्ति। केवलं केरलभट्टनामा केरलदेशीयो ब्राह्मणः प्रकृष्टदेवप्रयुक्तां रीतिमिमां नानुसरति। यथा—

राजा—रे रे प्रकृष्टदेव- किमिदं किमिदम् ?

प्रकृष्टदेवः—हे हे प्रजानाथ, एतस्य प्रकृष्टार्थप्रहीणस्य प्रतीकारः प्रक्रियताम्।

राजा—रे रे केरलभट्ट, प्रकृष्टाधायकं प्रपदं कुतस्त्वया परित्यक्तम्।

केरलभट्टः—देव, अस्ति हि विज्ञाप्यं किञ्चिद् यतो··· प्रशब्द एतन्मुखयोग एव परमकर्णकटुः।

प्रकृष्टदेवः—(राजानमुद्दिश्य) हे प्रपाय प्रजापालनप्रवीत ! प्रथमं तवापि प्रक्रियाप्रयोगः प्रविहितः (इत्यादि)। सूर्योदयवर्णनमप्यत्र दर्शनीयं विद्यते। यथा—

> प्रभाकरः प्रोन्नततां प्रयाति, प्रतिक्षणं तु प्रसभं प्रचण्डः।
> प्रकामयत्येव मनो मदीयं, प्रतारवप्रौढिमिव प्रहर्तुः॥

२०. (ग) पलाण्डु-मण्डनम् [कर्त्ता पूर्वोक्त एव]

श्रीमिश्रस्य तृतीयमिदं प्रहसनम्। अस्य प्रधानो विषयो 'भारतस्य विभिन्नेषु प्रदेशेषु निवसतां ब्राह्मणानां भोजनरीतिमधिकृत्य विनोदकरणमेव।' यथा हि— दाक्षिणात्याः पलाण्डुप्रियाः, बङ्गदेशीया मत्स्य-प्रियाः। इति। अत एव दाक्षिणात्या ब्राह्मणा विकृतमत्स्यभक्षिणो बङ्गदेशीयान् निकृष्टान् मन्यन्ते। पलाण्डुगन्ध-विरोधिनो बङ्गीया अपि दाक्षिणात्यानेवं मन्यन्ते। अनयैव दृशा कतिपयानां पात्राणां नामान्यपि तेषां रुचिकरभोज्यपदार्थनामभिरेव सम्बोधितानि। यथा— पलाण्डुमण्डनः, लशुनपन्तः, रक्तमूलिका चेत्यादि। हास्योत्पादनार्थमत्र लिङ्गोजीभट्टस्य द्वितीयपत्न्याश्चिञ्चाया गर्भाधानसंस्कारः प्रधानकथारूपेण वर्णितः।

प्रहसनेऽस्मिन् मूषकमेव प्रजापतिं मन्यमानानां ब्राह्मणानां वेदपाठ इत्थं प्रचलति—

"मूषको वै प्रजापतिरासीत्। तस्य द्वौ दन्तावास्ताम्। दन्तेन बिलं करोति। भाण्डं स्फोटयति। हविष्यान्नं भक्षयति।·········चूं चूं शब्दं करोति। यजमानं स्वर्गलोकं गमयति। अवे वेद।"इत्यादि।

लशुनपोटिकाया अपि प्रार्थनाऽतीव मनोहारिणी दृश्यते। यथा—

अये लशुनपोटिके सकलदुःखसंत्रोटिके,
महापथसुघोटिके परमपापसम्मोटिके।
सुगन्धहततोटिके परमसिद्धसच्छोटिके,
प्रसीद परमेश्वर-क्षुधिततृप्तिसद् रोटिके॥

पलाण्डुभक्षणस्य महिमाऽप्यत्रैवं वर्णितोऽस्ति—

"यत् खल्वाञ्जनेयचीत्कारप्रतिहतपुरजनोऽपि पलाण्डुभोगमात्रेण पुरुषो जायत इति।"

एवमस्य प्रहसनस्य पन्थाः कविना श्रीमिश्रेण नवीन एवादृतः।

२१. (घ) विबुध-मोहनम् [पूर्वोक्त एव]

इदं प्रहसनं चतुर्थं श्रीमिश्रमहोदयानाम्। अत्र शास्त्राण्यधिकृत्य विनोदाः प्रस्तुताः। सकलागमाचार्यस्य पुत्र्याः **'साहित्यमाला'**या **'अखण्डानन्देन'** सह विवाह एवास्य प्रहसनस्य कथावस्तु विद्यते। सकलागमाचार्यस्य प्रत्येकं पुत्र एक एव शास्त्रविशेषे प्रावीण्यं भजते। तेषां नामानि यथा—"तर्ककर्कश-पतञ्जलनाथ-वैशेषिकभट्टाचार्य-भट्टमीमांसा-पञ्चरात्रिकादीनि। अत्र लेखकः साहित्यशास्त्रमेव सर्वोत्कृष्टमिति प्रतिपादितवान्। रचनायां नैकानि सुभाषितानि प्रयुक्तानि सन्ति। यथा—

मूर्खो हि जल्पतां पुंसां श्रुत्वा वाचः शुभाशुभाः ।
अशुभं वाक्यमादत्ते पुरीषमिव शूकरः ॥
दृष्टिः कृतार्था प्रभुदर्शनेन, कर्णौ कृतार्थौ वचनामृतेन ।
हस्तौ कृतार्थौ चरणप्रणामादतः परं किं (मम) भागवत्याः ॥
खद्योतो द्योतते तावद्यावन्नोदयते शशी ।
उदिते तु सहस्रांशे न खद्योतो न चन्द्रमाः ॥ इत्यादि ।

२२. **(ङ) सहृदयानन्दः** —[कर्ता पूर्वोक्त एव]

इदं पञ्चमं प्रहसनमलङ्कारशास्त्रं विषयीकरोति । **अभिधा-लक्षणा-**व्यञ्जनाश्चैतस्मिन् प्रहसने स्वकीया-सामान्या-परकीयादिनायिकारूपेण वर्णिताः । हास्योत्पादनार्थं केषाञ्चिदश्लीलदृश्यानां प्रदर्शनमप्यत्र विहितम् । कपटब्रह्मचर्यव्रत-धारिणां सव्यङ्ग्यमुल्लेखोऽपि साधु वर्णितः ।

२३. **(च) घृतकुल्यावली** —[कर्ता पूर्वोक्त एव]

इदं श्रीहरिजीवनमिश्रस्य षष्ठं प्रहसनम् । अत्रापि लोके प्रवर्तमानानां रूढीनां परिचयपूर्वकं तन्निष्ठानां रूढिवादा विनोदपदवीमानीताः ।

एवमेकस्यैव कवेः षण्णां प्रहसनानां निर्मित्या प्रहसनसाहित्यं पर्याप्तमुन्नतिं प्रापत् ।[1]

२४. **उन्मत्त-कवि-कलश-प्रहसनम्** - वेङ्कटेश्वरकविः (१७००-१७५० ई०)

दक्षिणभारतस्य भोंसलनृपेन्द्र-शरभोजि-प्रथमस्याश्रितोयं कविर्ध्रुवकाश्यपगोत्रीयस्य धर्मराजस्य पुत्र आसीत् । अनेन कविना **'भोंसलवंशावलीचम्पूकाव्यं'** तथा **'सभापति-विलासनाटक'**मित्यनयोरपि रचना कृताऽभूत्[1] । कविना प्रहसने नान्दी-वन्दनानन्तरं स्वीयः परिचय एवं प्रदत्तः । यथा—

"**सूत्रधारः— (विचिन्त्य सहर्षम्)** हस्तगत**मणिमाणिक्यमापणे** मृग्यते । **मनु-निर्दिष्टविशिष्टमस्मद्वंश एव कुबेरकुमारिकातरलतरङ्गताण्डवितशीकरासार-शीतलोपशल्यमणलूराग्रहारहारनायकमणेः षड्दर्शनी-सागरनिशाकरस्य षड्भाषा**

१. एतस्य कवेः कृतीनां परिचयार्थं द्रष्टव्यम्—
जार्ज टी० अर्टोला लिखिते—हरजीवनमिश्र एण्ड हिज शार्ट संस्कृत प्लेज पृ. २ (रीप्रिन्ट फ्राम दि संस्कृत रङ्ग एन्युअल, ४, मद्रास १९६५.)

१. इमे त्रयोऽपि ग्रन्था हस्तलिखितग्रन्थसूच्यां सूचिताः सन्ति, मन्येऽद्य यावदेतेषां प्रकाशनं न जातमिति ।

सार्वभौमस्य प्रतिदिनप्रबन्धनिर्माणपरमेश्वरस्य धर्मराज-मनीषिणो भागधेयपरिणामेन बेङ्कटेश्वरकविना विरचितमुन्मत्तकविकलश-नामकृतं सकलहृदयानन्दविकसनं प्रहसनम् ।"

प्रहसन-साहित्यस्य समृद्धयेऽत्र कविराङ्ग्लसाहित्यस्य प्रहसनानां (Farce) प्रभृतीनां साम्यमयोजयत् । प्रेक्षकाणां विनोद एवास्य लक्ष्यम् । विटसभायां स्थितानां सामाजिकानां हृदयावर्जनार्थमिदं प्रास्तौत् कविः । भरतस्य नाट्यशास्त्रानुसारमत्र नान्दीपाठस्यापि सम्यक् पालनं विहितम् ।

२५-चण्डानुरञ्जनम्---घनश्यामकविः (१८ शत्याः पूर्वार्धः)

महाराष्ट्रभूमेस्तञ्जावरप्रान्ते तुकोजिराजस्य (१७२८-१७३५ ई०) मन्त्रिण आर्यकापरनाम्नो घनश्यामस्य ग्रन्थसम्पत् सर्वाधिका वर्तते । भवभूतिकृतं 'महावीर-चरित'-नाटकं चरमाङ्कद्वयं लिखित्वा ऽनेनन पूर्णतां नीतमिति प्रसिद्धिः । घनश्यामेन संस्कृते चतुःषष्टिग्रन्थाः प्राकृते च विंशतिग्रन्था रचिताः । एतेष्वेव 'चण्डानुरञ्जन'-मपि विद्यते । अस्मिन् हास्यप्राधान्यं तु स्वतः सिद्धमेव । कृतिरियमप्रकाशिताऽपूर्णा चोपलभ्यते

२६- डमरुकम्--(चित्रावली) घनश्यामकविः (पूर्ववत्)

अयमभिनेयप्रबन्धो—'राजानुरञ्जन-कलिदूषण-सुकविसञ्जीवन-कुकविसन्ताप-न-अबोधाकर-शाब्दिकभञ्जन-पण्डितखण्डन-जातिसन्तर्जन-प्रभुत्व-अखण्डानन्द'-नामकै-र्दशभिरलङ्कारैर्विभक्तः । अत्र नास्ति हीन-पात्राणां चरित्र-चित्रणम् । तथापि केचन विद्वांस एनत् प्रहसनकोटौ स्थापयन्ति परे च केचन न तथा मन्वते । केवलं पद्येष्वेवै-तस्य निर्माणं रूपकक्षेत्रे नावीन्यं पुरस्करोति । अस्य व्याख्या कवेः पुत्रेण चन्द्रशेखरेण विहिता, तत्र स इदं 'चित्रावली'नाम्ना सम्बोधयति । घनश्यामस्य द्वे पत्न्यौ कमला-सुन्दरी चेति नाम्न्यावास्ताम् । राजशेखरस्य 'विद्धशालभञ्जिका'याष्टीकाऽपि ताभ्यां रचितेत्यहो पाण्डित्यपरम्परासाम्राज्यसौभाग्यं कवेः ।

२७- कुमार-विजयम्—(कर्तादि-पूर्ववदेव)

इदमपि प्रहसनं श्रीघनश्यामकविना निर्मितमभूदिति तस्य पुस्तकसूच्या ज्ञायते । परमस्य परिचयादिकमस्माभिर्न प्राप्तम् ।

२८.—मदनकेतु-प्रहसनम् — रामपणिवादः (१७०९-१७८१ ई०)

केरलप्रान्तस्य विख्यातकवेः श्रीमतो रामपणिवादस्येयं रचना । अत्रद्वयोरङ्क-योर्लङ्काया नृपतिर्मदनभर्तुर्लिङ्गराजस्य राज्यं स्वीये राज्ये सम्मील्य स्वानुजं मदन-

वर्माणं तस्याधिपत्ये स्थापयति । लङ्कायां बौद्धभिक्षुर्विष्णुमित्रनामा संन्यासी अनङ्गलेखानाम्न्यां वेश्यायामनुरज्यति ।

मदनवर्मा च रहस्यमिदं विज्ञायाधर्मात् तं पराकर्तुं लाटदेशवासिनः कापालिक-शिवदासयोगिनः साहाय्यं प्राप्य सफलो भवति ।

स्वयं मदनकेतुरपि कामुक इव स्वां राज्ञीं श्रृंगार-मञ्जरीं विहाय चन्द्रलेखा-नाम्नीं वेश्यां कामयते शिवदासश्च पीठमर्दः सन् तत्साहाय्यं वितनुते । लटकमेलकवद-त्रापि सामाजिकं चित्रणं विद्यते । मदनकेतुश्चन्द्रलेखां वर्णयन् कथयति—

"नम्रालापैरमृतमधुरैरन्यमाह्लादयन्ती,
नारीनाम्ना जयति हि जगन्मोहिनी कापि शक्तिः ॥

तथैव विष्णुमित्र आत्मानमनङ्गलेखाया वृद्धया मात्रा ताडितोऽप्यात्मानं धन्यं मनुते—

कुट्टिन्या दृढमुष्टिकुट्टिकशतैर्निष्पिष्टसन्धीन्यपि,
प्रायो नातिरुजं भजन्ति विकसच्चित्तस्य गात्राणि मे ॥

एकतोऽत्र कविना कपटयोगिनां घटस्फोटो विहितस्तदाऽपरतो योगिमाध्यमेनैव लोक-कल्याणकामनाऽपि प्रकटिता विद्यते । यथा—

भूमौ यत्किल सञ्चिनोति दुरितं धर्म्यात् पथः प्रच्युतो,
लोकस्तत् खलु भूपतौ परिणमत्यम्भो यथाम्भोनिधौ ।
इत्यालोच्य हिताय ते यतिममुं दुर्मार्गपातोन्मुखं,
तत्त्वं बोधयितुं भवाब्धिजलधेरेष प्रयत्नो मम ॥११०॥

रचनायां प्रसादगुणस्य दर्शनान्यपि सुलभानि सन्ति । यथा विष्णुमित्रस्यान-ङ्गलेखां प्रत्यनुरक्तस्य दशावर्णने—

वसानः काषायं वसनमभिधानं रतिपते—
र्दधानस्तां चित्ते चकितहरिणीशावनयनाम् ।
वहन् पाणौ दण्डं विषयशफरीजालवडिशं,
परीरम्भाशंसी कथमपि नयाम्येष दिवसान् ॥इति॥

एवमियं रचना प्रसादगुणभूयिष्ठा नवनवोन्मेषशालिनी च सती विदुषां मनोरञ्जनमभिवर्धयति । अत्र ११६ पद्यानि सन्ति ।

२९. दौर्भाग्यमञ्जरी (पूर्ववदेव)—

श्रीरामपणिवादस्येयं द्वितीया कृतिः साम्प्रतमप्रकाशिता विद्यते । अस्य स्ताडपत्रप्रतिः तिरुवनन्तपुरस्य राजकीयसंग्रहालये सुरक्षिताऽस्ति । अस्यां संस्कृत-

मलयालम-मिश्राः श्लोकास्तिलतण्डुलवद् रचिताः । अत्र अध्वर्यपण्डितो नायको नायिका च दौर्भाग्यमञ्जरी । एकाङ्केऽत्र रूपके परिहासप्रधानताङ्गीकृता । यथा नायिकाया विकृतरूपवर्णने—

स्थूलस्थूलौ कपोलौ मटिमिलनितरां जानु तुंगी किटक्कं,
वक्षोजौ भङ्गभाजौ शिवशिव जरया शुष्कबिम्बौ नितम्बौ ॥ इत्यादि

३०. भानुप्रबन्धम्-प्रहसनम्-दक्षिणामूर्तिवेङ्कटेश्वरः (१८ शत्या मध्यभागे)

अयं कविः कौण्डिन्यकुलजन्मा दक्षिणामूर्तिवेङ्कटेश्वरनाम्ना प्रसिद्धस्तञ्जौर-शासकसम्बद्ध आसीत्[1] । रामभद्रदीक्षितस्य 'पतञ्जलिचरित'काव्यस्यायं व्याख्यां व्यधात् । यथा तत्रैव—

व्याचष्टे किल रामभद्रमखिलस्तस्याप्तशिष्यः कृती,
भौमीन्द्रं स हि वेङ्कटेश्वरकविर्यस्यां निबद्धं यशः ॥४॥

तथा "इति कौण्डिन्यकुलतिलक-दक्षिणामूर्तिवेङ्कटेश्वरशास्त्रिविरचितायां पतञ्ज-लिचरितव्याख्यायां ललिताख्यायां प्रथमः सर्गः" इति ।

इत्थमेव 'भानुप्रबन्ध'स्य भरतवाक्ये स्वं परिचाययन्नयं—

भूपाः पुण्यपथे चरन्तु, भवतु क्षेमं नृणां सर्वतः,
कालेष्वोषधयः फलन्तु कवयः खेलन्तु राज्ञां प्रियाः ।
कौण्डिन्यान्वयमण्डनाय जनितश्रीदक्षिणामूर्तिना,
काव्यस्यास्य च वेङ्कटेश्वरकविः कर्त्ता चिरं जीवतु ॥

इत्येतेनैतत् स्पष्टं भवति यत् कवेः पितुर्नाम दक्षिणामूर्तिस्तथा चायं रामभद्रस्य शिष्योऽभूत् । अस्य कथानकं नोपलब्धम् । पूर्वतनवेङ्कटेश्वराच्चायमतिरिक्त इत्यादि स्पष्टमेव ।

३१. विनोद-रङ्गः—श्रीसुन्दरदेववैद्यः (अनिश्चितकालिकः)

काश्यपगोत्रोद्भव-कीर्तिदेवस्य वंशावतंसश्रीगोविन्ददेवस्य पुत्रेण श्रीसुन्दर-देववैद्येन सन्धिद्वयसमन्वितस्यैकाङ्कस्य विनोदरङ्गाभिधप्रहसनस्य निर्माणं कृतम् । अस्य रचना वसन्तोत्सवे समागतानां सामाजिकानामनुरञ्जनार्थमभूदिति सूत्रधार-वचनेन ज्ञायते । यथा—

"नान्द्यन्ते सूत्रधारः अलमतिविस्तरेण । यदद्य वसन्तोत्सवसमयानुकूलं

---

१. आनन्दवल्लिदेव्याः करुणारसमेदुरा कटाक्षोर्मिः ।
भोंसलकुलमणिदीपं सुखयतु शाहाधिपं नित्यम् ॥

श्रीकविराजसुन्दरदेववैद्यविरचितेन 'विनोदरङ्ग'नाम्ना प्रहसनेन सामाजिकानुपास्यामः। (नेपथ्ये) कः कोऽत्र भोः वाचाट इव पण्डितसभासु।''

अथ चात्र परम्परानुसारमेव धूर्तानां तथा 'रागमञ्जरी'नाम्न्या वेश्यायाश्चरित्रचित्रणं प्रस्तुतम्। भरतवाक्येनास्य समाप्तिर्भवति। रचनाऽप्रकाशिताऽस्ति।

३२. **सोमवल्लीयोगानन्दः—अरुणगिरिनाथः** (अनिश्चतकालिकः)

चित्तौड़जनपदस्य विद्वत्परिवारे समुत्पन्नः कविरयमस्मिन् प्रहसने कयापि कुमार्या सह जायमानां प्रणयलीलामवर्णयत्। प्रारम्भ एव सूत्रधारोक्तौ स्वकीयं परिचयं महत्यारभट्याऽयमित्थं प्रस्तौति—

"अस्ति खलु परेन्द्राग्रहारनायकमणेः सामवेदसागरसांयात्रिकस्याष्टभाषाकवितासौराज्याभिषिक्तस्य पल्लावरस्थकटकविकुलगर्वपर्वतपवेनगिरणकविनागकेसरिणः श्रीमतः कविप्र(क्र)तोः पौत्रः, पुत्रः श्रीराजनाथदेशिकस्य, ब्रह्माण्डभाण्डपिचण्डमण्डलितडिण्डिभरवकण्डिमनः श्रीकण्ठागमशिखण्डमण्डनमणेः श्रीडिण्डिमप्रभोर्दौहित्रः कविसार्वभौम इति प्रथितविरुदनामधेयः सुलभभागधेयः सरस्वतीप्रसादलब्धकविताप्रसादः श्रीमानरुणगिरिनाथो नाम। तेन (प्रणीतेन) 'सोमवल्लीयोगानन्द'नाम्ना प्रहसनेन सभानियोगमनुतिष्ठामि।''

अनेन महाकवेः कालिदासस्य कृतिषु प्रसिद्धाष्टीका अपि लिखिताः।
प्रहसनमिदं मुद्रयित्वा जनसम्मुखं न प्राप्तमिति चिन्तास्पदम्।

३३. **सुभगानन्दः—श्रीवासुदेवनरेन्द्रः** (अनिश्चतकालिकः)

काश्मीरवासिनो गोविन्दश्रीवत्साङ्कोपनामधारिणो वासुदेवनरेन्द्रस्येदं प्रहसनं साम्प्रतमप्रकाशितं विद्यते। अस्यान्ते—

"काश्मीरीयण्डोरायदौहित्रमल्लस्त्रिविधवीरचूडामणि रायगोत्रगोविन्दश्रीवत्साङ्कापरनामधेय-श्रीवासुदेव-नरेन्द्र-विरचितं 'सुभगानन्दं' नाम प्रहसनं सम्पूर्णम्।''

इति लिखित वर्तते। अनेनैतदपि स्पष्टं भवति यदयं कविः काश्मीरस्य नृपतिरप्यासीत्। अस्य कथानकं पूर्णतया ज्ञातं न विद्यते।

---

१. यथाऽस्य प्रहसनस्य समाप्तौ—
'काश्यपगोत्र-पवित्रकीर्तिदेव-वंशावतंसश्रीविश्वनाथदेवात्मज-गोविन्ददेवसुत-सुन्दरदेववैद्यसंस्कृते विनोदरङ्गप्रहसने द्वितीयसन्धौ प्रथमोऽङ्कः। समाप्तमिदं प्रहसनम्।' इति।

३४. नाटवाट-प्रहसनम् —श्रीयदुनन्दनः (१९ तमशत्याः प्रारम्भकालः)

श्रीमतो 'वासुदेवचयनि'-सुतस्य यदुनन्दनस्येयं कृतिः[1] कस्मिन्नपि मदनमहोत्सवस्यावसरे समागतानां जनानां मनोविनोदाय निर्मितिमभजत्। अत्र प्रयुक्तो नाटशब्दः कर्णाटकस्यैकं नगरमिति कोशाभिमतम्। वाटश्च मार्गः। इत्यनुसारमेव पथिकानां वार्तालापा अत्र प्रस्तुताः किञ्च तेषु वार्तालापेषु शास्त्रविरुद्धाः प्रकृति-विपरीता अनर्गला आलापाः पाठकानां विनोदकरा भवन्ति। पात्राणां नामान्यपि विचित्राण्येव वर्तन्ते येषु वैद्यक-ज्यौतिषादिशास्त्रज्ञाः स्वस्वशास्त्रज्ञानशून्याः पण्डितम्मन्यास्तदातीन्तनकालस्य सामाजिकीं स्थितिं पुरस्कुर्वन्ति। सन्धिद्वये विभक्तमिदं कामप्येकां कथां न धारयति। प्रथमसन्धावागतानि पात्राणि द्वितीयसन्धौ नायान्ति।[2] अतोऽनुमीमते यदस्य रचना लोकनाट्यानुकारिणी विद्यत इति।

३५. स्नुषा-विजयम्—श्रीसुन्दरराजसूरिः 'वेलमयङ्गरः' (१९०४ ई०)

इलत्तूराग्रहार-ग्रामे समुत्पन्नस्य श्रीवरदराजसूनोः सुन्दरराजस्यास्मिन् प्रहसने श्वश्रूस्नुषयोर्मध्ये प्रचलितं कलहमधिकृत्याधुनिक-पारिवारिक-समस्यायाश्चित्रणं विद्यते। श्वश्रूर्दुराशा स्वस्नुषां सच्चरित्रां द्वेष्टि। श्वसुरः सुशीलः स्निह्यति। श्वश्रूः स्वपुत्र्यां जामातरि च स्निह्यति। श्वसुरस्तु स्थितिमेतां विज्ञाय कटु क्वणति। पुत्रः सुगुणो माध्यस्थ्यं कुर्वन् कलहनिवारणं करोति। अत्रानुष्टुब्छन्दसो बाहुल्यं विद्यते। अस्य सम्पादनं प्रस्तावना-संस्कृतटीकाभ्यां सहितं डॉ० राघवन्महानुभावैर्विहितमस्ति।[3]

अस्य पद्यमेकं निदर्शनायेत्थं वर्तते—

जामाता गृहमागतो यदि तदा क्षौमं च कन्थायते,
हैमं चारुपरिच्छदोचितमहो शुष्केन्धनं जायते।

---

१. इति वासुदेवचयनिसुतविरचितं 'नाटवाटप्रहसनं' सम्पूर्णम्। पुस्तकलेखकलेखः।
सर्पेभमुनिशाके भूवत्सरे च क्षयावहे।
आश्विने शुक्लपक्षे च नवम्यां सौम्यवासरे॥
काशीकराभिधानः त्र्यम्बको व्यलिखन् मुद्रा।
नाटवाटप्रहसनं यतये तत् समर्पितम्॥

२. अत्र पञ्चाङ्काः सन्ति तथेदं सामाजिकं नाटकमस्तीति 'आधुनिक संस्कृत-साहित्ये' डॉ० हीरालालशुक्लः प्रतिपादयति पृ० १३६ तथा 'संस्कृत में एकाङ्कीरूपक' नाम्नि शोध-प्रबन्धे डा० वीरबाला शर्मा एकाङ्कमिदं घोषयति पृ० १३१ इति चिन्त्यमेव।

सर्पिः सिन्धुजलायते दधि परं हन्तानलं जायते,
किं वाक्यैर्बहुभिः फलं सुरुचिरं काचायते काञ्चनम् ॥

अस्यैव कवेरपरा रचना 'रसिकरञ्जन'मस्ति।

३६- मुण्डित-प्रहसनम् — शिवज्योतिर्विद् (अनिश्चितकालिकः)

अस्य प्रहसनस्याभिधानमेव ज्ञायते। परिचयादिकं मृग्यमेव। केचन धूर्तसमागमकर्तारं ज्योतिरीश्वरठक्कुरमेतस्मादन्यं न मन्वते।

३७- वल्गुप्रहसनम्—श्रीरत्नाकरः (१८८०-१९१६ ई०)

अयं कविर्गुजीरप्रदेशस्य बटपद्र (बड़ौदा) नगरवास्तव्य आसीत् अयं गीर्वाणभारती[1] पत्रिकायामेको लेखक आसीत्।[2] चपलाचाञ्चल्यचम्पूरिति रचना अप्यनेन निर्म्मिता। प्रस्तुता रचना रूपकमयी विद्यते, उत प्रहसनकाव्यमयीति स्पष्टं नोल्लिखित माधुनिक-संस्कृत-साहित्यकारेण डा० हीरालालशुक्लमहादयेनेति चिन्त्यमेव।'

३८. कालविलासप्रहसनम् — राममयविद्याभूषणः (१८६२-१६३० ई०)

लाहौरतः प्रकाशिते 'विद्योदय'नाम्नि संस्कृतमासिकपत्रे कालस्य विकासं नानारूपेण वर्णयद् रूपकमिदं मुद्रितम्।[3]

३९. कलिमाहात्म्य-प्रहसनम्—(अज्ञातः) (१८६२-१६३५ ई०)

पूर्वोक्त एव पत्रे कस्यचनेदं प्रहसनमपि मुद्रितमस्ति।[4]

४०. पाण्डित्यताण्डवम् — श्रीवटुकनाथशर्मा (१८६५-१९४४ ई०)

वाराणस्या हिन्दूविश्वविद्यालयस्य प्राध्यापकेन श्रीशर्मणाऽत्र प्रहसने तदानीन्तनीं पण्डितमण्डलीमधिकृत्य व्यङ्ग्यो विहितः। आडम्बर-पाखण्डादीनां च निदर्शनं हृदयावर्जकं विद्यते। 'पाण्डित्यताण्डवित'मित्यस्यापरं नाम।[1]

४१. आत्मस्तुति प्रहसनम्—(अज्ञातः) (१८६८ ई०)

अत्र कविना स्वमुखेनैव स्वं सर्वोत्कृष्टं घोषयतां जनानां विषये व्यङ्ग्यं विधाय प्रहसनमारचितम्। आ. सं. सा. पृ. १२१

---

१. इयं संस्कृत पत्रिका—१९०६ ई० वत्सरात् बड़ौदातः प्रकाशिताऽभूत्।
२-३ संस्कृत पत्रकारिता का इतिहास, डा० रामगोपाल मिश्र पृ० २८
४. अर्वाचीन संस्कृत वाङ्मय—डा० श्रीवर्णेकरः पृ०

४२. संस्कार-कौतुकम् (विद्योदय' पत्रिकायां प्रकाशितम्)

(एप्रिल-जून १९१९ई०)

लाहौरतः पं० श्री ऋषिकेश भट्टाचार्यस्य सम्पादने प्रकाशिते १८७१ ई० तः प्रारब्धे 'विद्योदय' नाम्नि संस्कृतमासिकपत्रेऽस्य प्रहसनस्य प्रकाशनमभूत्। अत्र। धार्मिकान् संस्करान् लक्ष्यीकृत्य व्यङ्ग्यो विहितः। नापितः सर्वेश्वरस्तथा सुन्दर-शमऽस्य विदूषकपात्र-द्वयमस्ति।

४३. लीलाविलासम्—श्री एल० बी० शास्त्री (१९३५ ई०)

लीलाविलासम् चामुण्डा निपुणिका चेति एल. बी. शास्त्रि-मद्रास-द्वारा त्रीणि प्रहसनानि रचितानि पालघाटतश्च प्रकाशितानि १९३५ ई० वत्सरे।

इदं प्रहसनं मद्रपुरीवासिना श्री शास्त्रिणा विरच्य पलघाटतः प्रकाशितम्।

४४-४५- चामुण्डा निपुणिका च

श्री एल० बी० शास्त्रिण एवेदं प्रहसनद्वयमस्ति। प्रकाशनञ्चानयोरपि पालघाटत एव सम्पन्नम्। त्रयाणामप्येतेषां विषये विशिष्टः परिचयोऽस्माभिन प्राप्तः।

४६. शृङ्गार-नारदीयम्—वाइ० महालिङ्गशास्त्री (ई० स० १९३८ प्रकाशनम्)

रामायणस्योत्तरकाण्डगतसप्तत्रिंशे ३७ सर्गे प्रक्षिप्तांशरूपेण वर्णितां ऋक्षरजसः कथां तथा देवीभागवतस्य षष्ठस्कन्धगतसप्तविंशाष्टादशाध्याययोः प्रोक्तां नारद-विवाहकथामाश्रित्य महालिङ्गशास्त्रिणा प्रहसनमिदं रचितम्। अस्मिन् नारदस्य स्त्रीरूपे परिणमनं मनोहरतया वर्णितम्। विज्ञानयुगे सम्प्रति समाचार-पत्रेषु प्रायेण लिङ्गपरिवर्तनस्य समाचाराः पठ्यन्त एव। तेभ्यः प्रेरणां प्राप्य रचितेऽस्मिन् प्रहसने कविना महता चातुर्येण लिङ्गपरिवर्तनसम्बद्धानि पात्राणि सङ्गृहीतानि। प्रस्तावनायां विदूषकोऽत्र कविपरिचयं कारयति। यथा—

विदूषकः—अस्ति मे मित्रं श्रीमहालिङ्गः कविः।......।

× × ×

विदूषकः—बाढम्। तच्च शृङ्गार-नारदीयं नाम प्रहसनमचिरनिर्मितम्। सङ्गीतायात्रोपजातिवृत्तोपयोग आदृतः। गन्धर्वमिथुनं ऋक्षरजश्च गीतीर्गायन्ति। यथा—अहो दुरन्ता मदनस्य माया" इत्यादि।

नारदस्य स्त्रीरूपे परिणमनं तथा ऋक्षरजसो वानरस्य तत्प्रणयकामनया प्रणययाचनं नारदस्य 'रदना'रूपे क्रोधादयो हास्यसृष्टयेऽलम्भवन्ति। यथा—

पुमान् रूपवती नारी नारी स्याद् गाढयौवना।
सुन्दरी सरसि स्नात्वा यस्या ऋक्षरजाः पतिः॥

नारदः—आ पापिष्ठ, मर्कटपाश, नारदोऽहं ब्राह्मणः ।

अक्षरजाः—(सोपहासम्) हुम् नारदः । कुतोऽद्य नारदः ?

नारदो रदना जातो देवर्षिर्योषिदुत्तमा ।
ब्रह्मणः प्रथमः पुत्रस्तस्यैवानुत्तमा स्नुषा ॥

प्रसङ्गतोऽत्र सूर्यतेजसो वर्णनमपि कवेर्भाषाप्रौढिमुपढौकयति—

हिमस्रुतिपरम्परारजतश्रृङ्खलादामभि—
विलम्बमणिमञ्चकप्रचुरदर्शनीयं सरः ।
निविश्य निजबिम्बसम्मितमनोज्ञवर्ष्मा रविः,
शयालुरवलोक्यते करविराजिताम्भोरुहः ॥

स्त्रीपात्राण्यत्र संस्कृतमेव वदन्ति ।

४७. उभयरूपकम्—(कर्ता पूर्ववदेव)

इदं सामाजिकमेकाङ्कि प्रहसनम् । अत्र कुक्कुटस्वामिनः कनिष्ठपुत्रस्य छागलस्य माध्यमेन साम्प्रतिकेष्वाङ्गलपद्धत्या पाठितेषु युवसु व्यङ्ग्यस्य मधुरा धारा वाहिता । ग्रामीणस्य गुरोर्वज्रघोषस्य वार्तालापेन प्रहसनमारभ्यते । छागलः पठित्वा वृत्तिं प्राप्य च महान् बुभूषति ग्रामे चावकाशदिनेष्वपि स नेच्छति वस्तुम् । न ग्राम्यजीवनमेव सुन्दरं मनुते । छागलो ग्राम्यया कन्यया विवाहमपि नेच्छति न च सह यौतुकादानं कामयते । स तु स्त्रीयया सहपाठिन्या स्वेच्छाविवाहं वाञ्छति । एतस्मिन्नेवावसरे तस्य महाविद्यालये कोऽप्युत्सवो भवति यत्र छागलोऽभिनयाय नियुक्तः । गमनसमये स क्षौरकर्म कृत्वा केशान् नखांश्चैकस्मिन् पत्रपुटे निधाय गृहकोणे क्षिपति । स्वकीयमभिनयपाठं च तत्रैव विस्मृत्य त्वरया मद्रपुरीं प्रतिष्ठते । वैद्यराजस्तत्पत्रं पठित्वा तस्यात्महननाय निग्रहणं सूचयति । ज्ञात्वैवं सर्वेऽपि पारिवारिका दुःखिनो भवन्ति, परं रेलयानविश्रामस्थानात् प्रत्यावृतस्तदीयो भृत्यो यदा छागलस्य पत्रं पित्रेऽर्पयति तदा हास्यस्य वातावरणं व्याप्नोति । अस्य भरतवाक्ये श्वश्रू-वध्वोः कलहशान्तिप्रार्थनैवं विद्यते—

शाम्यन्त्वाशु ननान्दृभिः परुषिताः श्वश्रूस्नुषाविग्रहा,
वर्तन्तां सुमुखाः प्रसूतिषु समं वृद्धा गृहस्वामिनः ।
संश्लेषो घटतां नवप्रतनयोस्तत्तद्गुणालम्बनः,
साशंसाः प्रचरन्तु वर्त्मनि चिरं विद्वत्प्रिये भारताः ॥

४८. कौण्डिन्य प्रहसनम्-वाइ० महालिङ्गशास्त्री

मद्रपुर्यां १९३० ई० वत्सरे प्रकाशितम् । अस्यैव कवेः 'मर्कट-मर्दलिका' नाम भाणोऽपि विद्यते ।

४९. रागविराग-प्रहसनम्— श्रीश्रीजीवन्यायतीर्थः[1]

अनेकेषां रूपकाणां निर्माणेन संस्कृतकृतिकोषं पूरयतां श्रीश्रीजीवन्यायतीर्थानामिदं प्रहसनं—'सङ्गीतशत्रोरेकस्य राज्ञो राजसंसदो वर्णनं' प्रस्तौति। अस्य राज्ये गीतगानं निषिद्धमभूत्। राजा सङ्गीतविदोऽकर्मण्याः सन्तीति कथयित्वा तान् देशाद् बहिष्करणाय विधानमकरोत्। तदनुचरा एकं गायकं निगृह्य दण्डयन्ति तदैवैकं नवदम्पतीयुगलं स्वीयं मधुरं गानं श्रावयित्वा राज्ञो विचारेषु परिवर्तनमानयन्ति। तदनन्तरं राजा तत् पुरश्चिकीर्षति तदा तत् कथयति—

> तरुणः —राजन्! भवदीयशासननीतिपरिवर्तनमेव मे महान् पुरस्कारः। नाहं द्रव्यार्थी। भिक्षुकोऽयं सत्क्रियताम्, सैनिकश्च सम्मान्यतां धनदानेन।

अत्र गीतिषु जयदेवस्यप्रभावोलक्ष्यते। यथा–

> गोपीजनगणवल्लभ हे,
> वादय सुमधुरमुरलीं मुरहर, ललनाभयमपि दूरय सुन्दर,
> विश्ववरदकर-पल्लव हे।

५०. विवाहविडम्बनम्—श्रीश्रीजीवन्यायतीर्थः

इदं श्रीश्रीजीवन्यायतीर्थ-महाभागस्य द्वितीयं प्रहसनम्। अत्र साम्प्रतिक जगति विवाहमधिकृत्य प्रवर्तमानानां समस्यानां माध्यमेन विनोदमिश्रं कथानं प्रस्तुतम्। विवाहायातुरो रविकान्तनामा वृद्धो वार्धक्यापनोदनाय प्रयोगानाचरति। तत आत्मानं युवानं मत्वा कस्यापि धूर्तव्यापारिणो (दलाल) माध्यमेन कयापि सह विवाहाय सन्नद्धो भवति परमन्ते स एव मध्यस्थस्तस्य वार्धक्यरहस्यं प्रकटयति। द्वयोर्दृश्ययोर्विभज्य प्रहसनेऽस्मिन् कविर्नान्द्यां शिवस्तुतिं स्वपरिचयं च प्रस्तौति। अत्र कृष्णामषी-पटवास-चूर्ण- टायलेटपाउडर)—प्रभृतीनां प्रयोगेण नायकं व स्स्य विकृतरूपस्य परिष्करणाय प्रेरयति। वैज्ञानिकचिकित्सक-शङ्करनाथस्य गतस्य यौव-

---

१. श्रीश्रीजीवन्यायतीर्थाः स्वीयं परिचयं स्वीये 'प्रणवपारिजात'स्य विंशवर्षीये (१९७७-७८ ई०) वर्षाङ्के प्रकाशिते 'माधुरी-सुन्दरं' नाटके पारिपार्श्वकमुखेनेत्थं प्रस्तुवन्ति—

> गङ्गातीरतरङ्गसङ्गपवितां श्रीवङ्गभूमिं श्रिता,
> विख्याता किल कीर्तिपुष्पमिलिता या भट्टपल्ली लता।
> तत्राजायत तर्करत्नफलरूपाचार्यपञ्चानन—
> स्तज्जातोऽरचयन्नवं प्रकरणं श्रीजीवशर्मा श्रिया॥ पृ० ६॥

नस्य पुनरुपलब्धये भेषजविधानमप्यत्र चर्चितम् । यथा—

"केशकल्पे पञ्चशतानि, कायकल्पे सहस्रं, कपिपेशीयजनेऽपि तथा ।

रतिकान्तः—धनव्ययार्थं सज्जोऽस्मि । षण्मासापेक्षा न सम्भवति । पक्षकालमध्य एव केशकल्पं क्रियतामिति ।"

शङ्करनाथः — श्रूयताम्—केशकल्पं कायकल्पं कपिपेशीनिवेशनम् ।
कृत्वा षण्मासमध्ये स्याद् वृद्धोऽपि तरुणद्युतिः ॥

५१-६० अस्यैव कवेरन्यानि प्रहसनानि—

महाकवि-श्रीश्रीजीवन्यायतीर्थानां रूपकसम्पदतीव स्पृहणीया विशाला च वर्तते । तेषु प्रहसनानां सङ्ख्याऽपि प्रायेणद्वादशमिता विद्यते । तत्र द्वे तूपरि वर्णिते एव । शेषाणां नामानीत्थं सन्ति—

१. विधिविपर्यासम्
२. चण्डताण्डवम्
३. दरिद्रदुर्दैवम्
४. वनभोजनम्
५. पुरुषलक्षणम्
६. स्वातन्त्र्यमहाहुतिः
७. क्षुतक्षेमम्
८. स्वातन्त्र्ययज्ञाहुतिः
९. व्रतभोजनम्
१०. स्वातन्त्र्यसन्धिक्षणप्रहसनम् ।

६१. सङ्कर-विवाहम्—श्रीविश्वेश्वरः

अत्र नायिका मनोरमाया वृद्धामातुर्भागीरथ्याः परित्यागो वर्णितः । सा कृष्णाजीनामकेन तरुणेन सह द्वितीयं विवाहं करोति । तस्या अस्य कर्म्मणोऽनुमोदनं तदीयो वाक्कीलो गोडबोलेऽप्याचरति । यथा—

साधु त्वया जराजीर्णः सन्त्यक्तः स्वेच्छया पतिः ।
अन्यो नवश्च सद्भर्ता पुनरूढो गुणान्वितः ॥

तथा भागीरथ्यपि तस्य समर्थनमेवं करोति—

दण्डिनं भारविं माघं बायनं शेक्सपीयरम् ।
कवीन्द्रं कालिदासं च भवानति हि वर्तते ॥

६२. विमुक्तिः (प्रहसनम्) —डॉ० वी० राघवन्महोदयः

डॉ. राघवन्महाभागानामिदं प्रहसनं—मायायां लिप्तस्य मनुष्यस्य सङ्घर्षव्यथं पीडनं, इच्छायाः प्रतिघातात् क्षोभः, इष्टसिद्धया प्रसादः, कुत्सितेन घृणा वाञ्छितार्थाप्राप्त्या करुणं क्रन्दनं'—प्रभृतीन् विषयान् दृश्यानां माध्यमेनोपस्थापयति ।

द्वयोरङ्कयोर्विभक्तस्यास्य रूपकस्य नायकं आत्मनाथं, विप्रकविर्जीवात्मनः प्रतीकं मनुते। तस्य षट्सु पुत्रेषु ज्येष्ठस्तनयो लटकेश्वरो' मनसः' तथा 'चलप्रिय-शुण्डाल-दीर्घश्रव-उलूकाक्ष-कण्डूल'-प्रभृतयः पञ्च पुत्रा इन्द्रियाणां प्रतीकभूताः सन्ति। ब्राह्मणस्य भार्या 'त्रिवर्णिनी' प्रकृतिरूपा। यस्या माता 'मायावती' मायाऽस्ति। तस्यास्तिस्रो भगिन्यः 'चन्द्रिका शोणिता हस्तिनी च क्रमेण सत्त्वरजस्तमांसि प्रति सङ्केतयन्ति। वृद्ध ईश्वरस्य व्यञ्जकः। दंष्ट्री राज्ञः सर्वाधिकारी श्यालकः। धर्मयमौ राजश्यालकस्य भृत्यौ। पौरजनाः स्वस्वशास्त्रमार्गाननुसरन्ति। इदं सर्वं भरतवाक्यपद्याद् ज्ञायते। यथा—

ईशस्त्वं पुरुषोऽस्मि गेहमिह मे देहं स दंष्ट्री यमः,
सा भार्या प्रकृतिर्गुणा भगिनिका माया च तस्याः प्रसूः।
षट् पुत्रा मन इन्द्रियाणि नगरं लोको विमुक्त्यै ततः,
सत्त्वस्था प्रकृतिस्तथा प्रहसनं दृष्ट्वा जना जानताम् ॥[1]

६३. अमर्षमहिमा— श्रीवेङ्कटाचार्यः

गृहस्य कार्यालयस्य चानुभूतीनां नाटकीकरणमत्र कविना विहितम्। रामचन्द्रनामा कश्चनाधिकारी स्वीयां पत्नीं भाग्यवतीं भोजन-निर्माणे विलम्बं कुर्वतीं दृष्ट्वा तस्यै क्रुध्यति क्रोधावेशाच्च भोजनमकृत्वैव कार्यालयं गच्छति। तत्र स स्वस्य निरपराधिनं सहायकं चन्द्रशेखरं भर्त्सयति। परिणामतश्चन्द्रशेखरोऽपि गृहगमनानन्तरं पत्न्या सरोजनाम्न्या सह विवदते। सा च स्वसेवकं कालिकाख्यं तर्जयति। एवमुच्चाधिकारिण आरभ्य सामान्यसेवकं यावत् क्रोधस्य प्रतिक्रियाशृङ्खला बद्ध्यते। सामाजिकीं परिस्थितिमिमां परिहासपूर्वकं प्रस्तूय कविना तादृशेषु जनेषु व्यङ्ग्योऽपि विहितोऽस्ति।[1]

६४. अन्त्येष्टिसंस्कारः— अनु० श्री के० कमला

कवीन्द्रश्रीरवीन्द्रस्य'अन्त्येष्टिसंस्कार'-नामकप्रहसनस्यायमनुवादः। अत्र कस्यापि मरणासन्नवृद्धस्य पुत्रैः स्वपितुर्मृत्युसमाचारस्य सर्ववेदिताकरणायाति विस्तृतरूपेण सज्जता कृता। ततः परं चिकित्सकस्य धारणाविरुद्धं स वृद्धः पुनः स्वस्थोऽभूत्। एतेन सर्वाण्याप्यागतानि मित्राणि पुत्राः सम्बन्धिनश्च तदन्त्येष्टये समागता नितान्तं विस्मयं प्राप्ताः। एवमत्रान्यप्रहसनानामिव दाहसंस्कारविषयेऽपि व्यङ्ग्यः कृतः।

१-इदं प्रहसनं संस्कृतरङ्गद्वारा तदीये चतुर्थवर्षस्योत्सवेऽभिनीतमभूत्।

१-अस्मिन् प्रहसने आङ्ग्लभाषायाः 'ऑन सेइंग प्लीज' इति निबन्धस्य प्रभावः स्पष्टो भवति।

६५. आलस्य-कर्मीयम्—श्री के. आर. नायरः

'अलब्धकर्म्मीयम्' इत्यपरनामकेऽस्मिन्नेकाङ्कके व्यङ्ग्यरूपके चित्रितैः पात्रैर्लक्षणया संस्कृतभाषायास्तत्साहित्यस्य तथा कल्पनालोकस्याभिसूचनं कृतमस्ति। अत्र कस्यचन जीविकारहितस्य संस्कृतस्य दरिद्रविदुषो दुर्दशा चित्रिता विद्यते। स स्वकीयं परिवारं निर्धनताया मोचयितुं यदा सेनायां प्रवेशस्य कृषिकर्म्मणि वा प्रवर्तनस्योपायान् चिन्तयति स्म तदैवैकस्यां संस्कृतपाठशालायां वृत्तिं लभते। केचन समालोचका एतत् प्रहसनं व्यङ्ग्यनाटिकारूपेण स्वीकुर्वन्ति।

६६. सर्वदल-सम्मेलनम् — डॉ. रुद्रदेवत्रिपाठी

इदं प्रहसनं द्वयोर्दृश्ययोर्विभक्तं विद्यते। अत्र कविना भारतस्य स्वतन्त्रता-प्राप्त्यनन्तरं देशे निरन्तरं वर्द्धमानानां राजनीतिकदलानां तेषां कार्यव्यवस्थानां च विवरणं प्रस्तूय सर्वेषामैकमत्य-विरहः परिचायितः। संस्कृतभाषया सहांग्लादि-भाषाणां मिश्रणेनात्रैकं वैशिष्ट्यमपादितं हास्यसाहित्ये।

अत्र प्रथमे दृश्ये मित्रद्वयं संल्लपति तस्य च संल्लापमाध्यमेनैव ज्ञायते यत् भारतस्य प्रधाननगरे 'सर्वदलसम्मेलनं'[1] भविष्यतीति। तदनुसारमेव द्वे अपि मित्रे संस्कृत-संस्कृतः प्रबुद्धसंस्कृतश्च तत्र गन्तुमुत्सुके भूत्वा यात्रावस्तूनि सङ्गृह्य त्रिकटग्रहणस्थानसंरक्षणव्यवस्थां च विचारयतः। द्वितीये दृश्ये तौ यात्रां विधाय सम्मेलन-स्थलं प्राप्नुतः। यथासमयं सम्मेलनाय प्रविविक्षू तौ स्वयंसेवकेन प्रवेश-पत्रं विना विलोक्य निरुध्येते। तदैकः कथयति—

सम्मेलने राजगृहे च याने, क्रीडासु पार्टीषु च होटलेषु।
लॉंग्रूफवासोधरभुक्तजेला, गच्छन्ति ते स्वेच्छमरोकटोकम्॥

ततः परं यथाकथञ्चित् तौ प्रविशतः। तृतीये दृश्ये सभायाः सभापतेः स्वागतादिकं भवति। तत्र काश्चन कन्यकाः स्वागतगीतिं प्रस्तुवन्ति।

यथा— श्रीमतामिह वेलकमेन ग्लेडतां प्राप्नोति चेतः।
द्रष्टृयूथोऽप्येष जातः प्राप्तपुण्यफलः समेतः॥ इत्यादि।

ततः परं क्रमशः सर्वेषां दलानां प्रतिनिधयः स्व-स्वदलस्वीकृतानि वस्त्राणि धृत्वा ध्वजादींश्च नीत्वा परिचयानुपस्थापयन्ति। तत्रापि पद्यानां रचनाऽतीव विनोद-पूर्णाऽस्ति। यथा—

---

१. अत्र कां-स-क-हि-रा-ज-कृ-म-मु-द्र-स्व प्रभृतीनां दलानां प्रारम्भाक्षरैः समा-वेशः। यथा-कांग्रेस समाजवाद कम्यूनिस्ट हिन्दूमहासभा रामराज्य जन-सङ्घ कृषकमजदूरपार्टी मुस्लिमलीग द्रविडकजगम् स्वतन्त्रपार्टी चेति।

इमे गद्दाराः स्वान् वचनरचनाभिर्बहुविधं ,
प्रलोभं दत्त्वा वै जगति ठगते हैं प्रतिदिनम् ।
तथा ब्लेकं कृत्वा दधति भुवि पूंजीपतिपदं,
ह्यतो निःसार्यैतान् कृषकजनराज्यं कुरुत रे ।।१२।।

वयं कम्युनिष्टा जगत्यां वरिष्ठा विदेशेऽपि चास्मत्सखायो दविष्ठाः ।
न दीनो न हीनो न वा कोऽपि पीनो, भवेद् भूमिभागे तथा चास्ति निष्ठा ।।१५।।

'द्रविडकभ्झगं' लोकाः शोकापवारणहेतवे,
गड़बड़मिदं त्यक्त्वा सर्वं सदा द्रविडस्थलम् ।
धड़धड़युतं वष्टि प्रीत्या यतो द्विजमण्डलै—
र्बड़बड़कृतं कृत्वा हक्काद् वयं विनिवारिताः ।। इत्यादि ।।

चतुर्थे दृश्ये सभापतिः प्रस्तावान् प्रस्तौति स्वीकारयति च ।

अस्य प्रकाशनं कवेः 'डिण्डिम' नाम्नि विनोदकवितासंग्रहे १९६० ई० वर्षे सञ्जातम् ।

६७. गुरुवाक्यम्—अनु० डा० रुद्रदेवत्रिपाठी

कवीन्द्रस्य श्रीमतो रवीन्द्रठक्कुरस्य 'गुरुवाक्य'नाम्नः प्रहसनस्यायमनुवादः संस्कृतज्ञानां विनोदाय विहितः । अत्रानुवादे प्रहसन-रूपकपरम्परानुसारं मूलगद्यांशानां यत्र तत्रावश्यकतानुसारं पद्यान्यपि निर्मितानि सन्ति । अच्युत-अपूर्व-उमेश-कार्तिक-खगेन्द्रादयो भूमिकां निर्वहन्ति । मुख्यतश्चर्चाया विषयोऽत्र—

युध्यन् जटायुः सम्प्राप्तो रावणेन समं रणे ।
मृत्युं कोऽर्थः कारणं किं तात्पर्यं तस्य किं भवेत् ।।

इत्यस्ति । एतस्य खगेन्द्र एवमुत्तरं प्रस्तौति—

वक्तुं न प्रभवामि यद्यपि दृढं खर्वः सगर्वं परं,
मन्ये कारणमेकमेव मरणे युद्धे जटायोरहम् ।
अस्त्रेणाथ स तादृशेन हतवान् केनापि तं रावणो,
येनाजस्रमुदात्तधीरपि खगः साङ्घातिकः सोऽभवत् ।। ५ ।।

इदं 'विनोदिनी' नामके विनोदकाव्यसङ्ग्रहे प्रकाशितम् ।

६८-माला-भविष्यम्—श्रीस्कन्दशङ्करः

नागपुरस्थश्रीखोतकवेरिदं प्रहसनं सामाजिकं कल्पितविषयमाश्रित्य विरचितं विद्यते ।

६९-७४-अनेनैव कविना विर्थिन उद्दिश्य—

"कः श्रेयान् लालावैद्यम्, ध्रुवतारम्, अरघट्टघटम्, हाहन्त शारदे !" नामकान्यन्यान्यपि पञ्च प्रहसनानि रचितानि। एतेषां सर्वेषां मुद्रणं नागपुरेऽभूत् तथा तत्रैव मोहमय्यां चासकृदभिनया अपि समपद्यन्त।

७५-११६. अन्यानि स्वल्पपरिचितानि प्रहसनानि

विभिन्नेषु ग्रन्थेषु भिन्न-भिन्नासु संस्कृतपत्रिकासु तथा परिचितरचनाकाराणां संग्रहेषु प्रकाशितान्यप्रकाशितानि सुबहूनि प्रहसनानि प्राप्यन्ते। साम्प्रतिके स्वाच्छन्द्य-काले यथाऽन्यासु भाषासु भाव-प्रकटन-स्वातन्त्र्यं दृश्यते तथैव संस्कृतभाषायामपि शनैः शनैः शास्त्रीयाणि लक्षणानि विहाय रचना-निर्मितेराग्रहो भूयान् वर्धते। तदनुसारमेव यानि प्रहसनानि ज्ञायन्ते तेषां नामानि कर्तृनामसहितान्यत्र विदुषां निदर्शनाय लिख्यन्ते— "१-अनुकूलगलगलहस्तकम्, २-मणिकाञ्चनसमन्वयः, ३-शिल्पं चेति त्रीणि श्रीविष्णुपदभट्टाचार्यस्य। ४-कपोतालयः-श्रीमत्या लीलायाः। ५-ननानिताडनम्, ६-स्वर्गीयहसनं च श्रीसिद्धेश्वर-चट्टोपाध्यायस्य। ७-लीला-विलासप्रहसनम्-व्यासराजशास्त्रिणः। ८-नवोढा वधूः वरश्च-श्रीपट्टाभिरामशास्त्रि-णाम्। ९-तीर्थयात्रा-प्रहसनम्-रामकुबेरमालवीयस्य। १०-नवरसप्रहसनम्-राजेन्द्र-मिश्रस्य। ११-नाट्ये च दक्षा वयम्- वा० का० क्षीरसागरस्य। १२ बुद्धिप्रहसनम्-गजेन्द्रशङ्करलाल पण्डयामहोदयस्य। १३-प्रतापरुद्रियविडम्बना-अज्ञातस्य। १४-अन-ङ्गदाप्रहसनम्-जग्गू श्रीबकुलभूषणस्य। १५-हास्यकुमुदाकरः कल्लूरिवेंकटरामस्य। १६-वञ्चनाफलम्-चिलकूरिरामभद्रशास्त्रिणः। १७-कृष्णदौत्यम्, १८-शिवरात्रि-माहात्म्यम्, १९-आनन्दकोशः, २०-देवदुर्गतिः २१-धूर्तचरितम्, २२-हृदयविनोदः, २३-कालिदास-प्रहसनम्, २४-धूर्तविडम्बना, २५-कन्दर्पकेलिप्रहसनम्, २६-लम्बोदर-प्रहसनम्, २७-मिथ्याकरप्रहसनम्, २८ पयोधिमन्थनम्, २९-सान्द्रकुतूहलम्-कृष्णदत्तस्य, ३०-प्रहसनम्-शिवरामशर्मणः, ३१-कुक्षिभरणम्-श्रीवेंकप्पेटस्य ३२-प्रत्याशिपरीक्ष-णम्-हरिदत्तशास्त्रिणः, ३३-पण्डितचरित-प्रहसनम्-मधुसूदनकाव्यतीर्थस्य, ३४-कलिविडम्बनम्, ३५-कुहनाभैक्षवम्-बोम्भकण्ठिगङ्गाधरस्य, ३६-पाखण्ड-विडम्बनम्-माहेश्वरस्य, ३७-कालेय-कतूहलम् ३८-काशीदास, ३९-उन्मत्तः, ४०-कविसम्मेलनम् श्रीविश्वनाथशास्त्रिणः ४१- विधवा-विवाहः ४२- भ्रमरकाहली प्रभृतीनि।

पर्यालोचित-प्रहसन-परम्परोपसंहारः

यथा यथा युग-परिवर्तनं भवति तथा तथा साहित्यकारा अपि स्वीयान् विचारान् परिष्कृत्य समाजस्याग्रे पुरस्कुर्वन्ति। यतः प्रभृति भारतस्य स्वातन्त्र्य-प्राप्तेर्विचाराः समाजे प्रवृत्तास्तत एवारभ्य संस्कृतसाहित्यकाराणां विचारधारास्वपि नावीन्यमायातम्। आङ्ग्लशासकानाँ कपटनीतिं समभिलक्ष्य तेषां भारतीयान् प्रति दुर्व्यवहारान् विज्ञाय किङ्कर्तव्यविमूढानां भारतीयानां प्रबोधनाय कर्तव्यनिर्देशाय च नानाविधं साहित्यं निर्म्मितं प्रकाशितञ्च।

एवमेव स्वातन्त्र्यसङ्घर्षानन्तरं स्वतन्त्रे भारते सति तत्तत्कालसमुत्पन्नानां समस्यानां समुपस्थापनाय तासां समाधानाय च प्रेरणाप्रदा नैका रचना अपि प्राधान्येन सामाजिकीनां स्थितीनां वैशद्येन प्रस्तुतीकरणमेव लक्ष्यमभूत्। दरिद्राणां दुर्दशाः कृषकाणां कथाः संस्कृतभाषायास्तद्भाषाविदां च समस्या अधिकृत्यास्मिन् काले रचना अभूवन्।

इतः परं जनतन्त्र-शासनपद्धतिमभिलक्ष्य पर्यालोचयद्भिर्विद्वद्भिस्तदानीन्तन-प्रवर्तितानां दलानां गुणावगुण-विमर्शोऽपि स्वीकृतः। विभिन्नानां शासनारूढानां नेतॄणां तत्तद्दलानां तद्विरुद्धानां दलानां च पारस्परिका विवादा अप्यत्र विवेचनापदवीमानीताः। इमे सर्वेऽपि विषयाः संस्कृतसाहित्ये दर्पणमिव समाजस्य याथातथ्यं प्रस्तुवन्तः काव्येषु रूपकेषु कथानिकासु तदितरविधात्मकेषु च ग्रन्थेषु बहुधा जनसमक्षमुपागता इति सुनिश्चितमेव।

प्राचीनानां शास्त्रीयलक्षणानां दृढरूपेण पालन-बुद्धिरपि क्रमेण शिथिलतां श्रयन्ती 'आवश्यकतानुरूपानाविष्कारान्' प्रकटयन्ती पुरः पदं न्यधादेव। साम्प्रतिके युगे विचाराणां प्रकाशनस्य क्षेत्रं मनाग् विस्तृतमभवत्। मुख्यत्वेन मुद्रणस्य सौविध्याधिक्यात् तथाऽऽकाशवाणीद्वाराप्रसारणसौलभ्यात् तयोरनुकूलमेव लेखनविधेरपि सामञ्जस्यं साधितम्। अत एव निश्चितस्थान-निश्चितकाल समाप्यं साहित्यमपि निरन्तरमेधमानं सद् जनानां मनोऽनुरञ्जनं विदधाति। लघु-लघु-संवादाः विद्यालयानां वार्षिकोत्सवावसरे विद्यार्थिभिरभिनेयानि लघुरूपकाणि नभोवाण्या माध्यमेन प्रसार्यमाणा वार्तास्तथा सामयिक-पत्र-पत्रिकासु प्रकाशनार्हा विनोदवीचयः सम्प्रति यावतीं विपुलतामाश्रिता न तथा पुरातने काले।

अस्ति संस्कृतभारत्या आत्मसात्करणरूपमौदार्यं सर्वविदितम्। भावैर्विचारैर्भाषाभिः प्रक्रियाभिश्च नूनं सदैव संस्कृतभाषा स्वं कोशं पूरयत्येव। प्रहसनसाहित्येमपि-तद्वदेव विद्वांसः कवयस्तांस्तान् प्रकारानादृत्य रचितवन्तस्तत्रापि विविधदेश्यभाषाणां

वैदेश्याङ्ग्लभाषायाश्च सर्वप्रचलितशब्दानां समावेशेन सह परकीयसंस्कृतिसमादर-स्वसंस्कृतिविलोपनमूलकानां विचाराणामपि प्रस्फोटनमत्र विहितं विद्यत इति सत्यमेव स्पृहणीयम् ।

संस्कृतभाषा मृतभाषेति वचनैरात्मनोऽज्ञानमुद्घोषयतां मुखं मुद्रयितुं युगानुरूपं साहित्यं कियतीं विस्तृतिं प्राप्नोतीति प्रहसनसाहित्यमपि तथैवोन्नतभालं विद्यत एवेति निदर्शनायेयं पर्यालोचनाऽलंभविष्यतीति ।

महाकविः श्रीसामदीक्षितः

वंशः स्थितिकालश्च कृतित्वं च

संस्कृतविद्यासेवकाः कविपुङ्गवाः प्रायेणात्मख्यातिविमुखा एव स्थित्वा निर्व्याजं सेवामकुर्वन्, अत एव बहूनां कविपुरन्दराणां वंशपरिचयाः कालपरिचयाश्च सम्यक्तया नोपलभ्यन्ते । तथाप्यासन्नकालिकत्वाद् महाकविः श्रीसामराजदीक्षितस्तु न तथेति परमं सौभाग्यं संस्कृत-सेवाहेवाकिनाम् ।

' "बाह्यान्तः साक्ष्याभ्यां सत्यापितो भवति प्राक्तनजनस्य परिचयः" इत्यनुसारं बाह्यसाक्ष्यरूपेणेदं ज्ञायते यत्—

'काश्यामद्यापि श्रीसामराजदीक्षितस्य वंशजानामेका शाखा वसतिमती विद्यते, या हि यथावसरं बुन्देलखण्डनृपतिसमर्पितभुवां स्वामित्वं बिभ्रती कालक्रमेण 'बिन्दु-पुरन्दरे' कुलोपाध्यनन्तरं 'चिरन्तनमोरवडीकर'—'बान्धवकराद्युपनामसु साम्प्रतं 'बान्धवकर'नाम्ना प्रथिताऽस्ति ।[1] इति । तथा श्रीसामराजदीक्षितप्रणीतग्रन्थेषु 'धूर्तनर्तकश्रीदामचरित -रूपकयोरन्तर्गतप्रस्तावनांशाभ्यामन्तः-साक्ष्यरूपेण[2] ज्ञायते यत्—

१-अत्र विषये पूज्यपादैः श्रीमदमृतवाग्भवाचार्यवर्यैरहं सङ्केतितोऽस्मि तेषां पूर्वाश्रमसम्बन्धनिबन्धनादिति तेषां कृपा-प्रसादः ।

२-(क) सूत्रधारः—····"यद् दीक्षितनरहरिकुलावतंसेन तर्ककर्कशजलधिकूलोत्तंसेन सरससाहित्यसुधासरोहंसेन सकलकलाभिज्ञेन दीक्षितसामराजाभिधेन विरचितम्" इत्यादि ।

तथा च —नरहरिकुलाब्धिचन्द्रो नरहरिमान्यो हि सामराजो यः ।
नरहरिवन्द्यतनुर्नरहरिचरणाब्जरोलम्बः ॥ ४ ॥ (धूर्तनर्तके)

कविरयं दाक्षिणात्यब्राह्मणो 'बिन्दुपुरन्दरे' कुलजन्मा विद्वद्वरश्रीनरहरि-दीक्षित'-महाभागानां सुपुत्र आसीत्। स्वकीयया पाण्डित्यप्रतिभया भगवत्यास्त्रिपुर-सुन्दर्याः प्रसादेन च जगतीतलं भास्वरयन् दीक्षितवर्योऽयं बुन्देलखण्डस्य शासक-श्रीमद्—'**आनन्दराय**' नृपतेराश्रये तत् 'सभापण्डित'रूपेणाध्यवात्सीत्।[1] विदुषां गुणाति-शयसमादरकर्तुस्तस्यैव नृपतेर्दानौदार्याभ्यामेव श्रीदीक्षितस्तदुत्तरकालिका वंशजाश्च तत्समर्पिताया भूमेः स्वामित्वमधारयन्। अथ च वयस उत्तरे काले कविरयं मथुरायां चिरमुवास। श्रीकृष्णजन्मभूमेर्निकट एवैकं '**महाविद्यामन्दिरं**' विद्यते तत्रास्य निवासं प्रकटयन्ति तत्पारिवारिका माथुरा विद्वांसश्च। अयं किल भगवत्यास्त्रिपुरसुन्दर्याः परमोपासकस्तथा पूर्णाभिषिक्तश्चासीदत एव मथुरायां तज्जनपदे च श्रीसामराज-दीक्षितचरणेभ्यः प्राप्तश्रीविद्यादीक्षा बहव उपासकाः प्रावर्तन्त। साम्प्रतं मथुरायां तत्परिसरे च यावन्तः श्रीविद्योपासका वर्तन्ते तेषामपि परमेष्टिगुरुत्वं श्रीदीक्षित-स्यैवास्तीति प्रसिद्धिः।[2] अस्यैव महापुरुषस्य विमले वंशेऽस्य सूनुः श्रीकामराजः

(ख) सूत्रधारः—प्रिये,...'स्मरसि नरहरिदीक्षितसूनुना दीक्षितसामराजेन आनन्द-रायरञ्जनाय 'श्रीदामचरितं' नाम नाटकं विरच्य। इत्यादि तत्रैव।

१-अत एवायं कविः श्रीदामचरितनाटकस्य प्रस्तावनायां नृपमिममेवं संस्तौति—...'अथ कः पुनः आनन्दरायो यस्य कर्णसदृशस्य त्रिभुवनजनकर्णप्राघुणिका कीर्त्तिः सः ?' इत्यस्योत्तरे—

सूत्रधारः—प्रिये स एव कामाभिरामः।

आकैलासात् प्रथमशिखरादासुवेलाचलान्ता-
दापौलोमीविहरणगिरेराप्रतीची(च्या ?) दहार्यात्।
विश्वे विष्वङ्मधुरशिशिरान् चञ्चलाकूणिताक्षं,
पायं पायं श्रवणपुटकैर्यद्गुणानुद्गृणन्ति ॥ ६ ॥

अपि च—कुञ्चत्कल्पतरूणि मूकितगुरूण्यापन्नवित्ताधिपा-
न्याक्रन्दद्रिपुवल्लभानि विदलद् ब्रह्माण्डभाण्डानि च।
कम्पदद्दिग्दयितानि रज्यदबलान्याह्लादि बन्धुव्रजा-
न्याकुञ्चत्कमठानि यस्य चरितान्यामोदयन्ते जगत् ॥ ७ ॥

अपि च—आस्थानी सद्गुणानां निखिलनयवनीनिर्गमो बोधसिन्धो-
रालानं श्रीकरेणोः कुलवसतिगृहं भारती विभ्रमाणाम्।
वापी वाणीसुधायाः सकलसुजनतामूलमद्रिः कृपायाः,
केलीसिन्धुः क्षमाया धवलयतितरां यः स्वकीर्त्या जगन्ति ॥ ८ ॥ इति।

२-मथुरायां श्रीविद्योपासकेषु श्रीभैय्याजी श्रीप्रकाशानन्दजी महाराजोपनामक-श्रीकेशवदेवमहाराजानां पूर्वाश्रमसुताः श्रीकरुणाशङ्करशास्त्रिणो गतश्रमटीला-

(१६८० खिस्ताब्दात् १७२० खिस्ताब्दान्तरालवर्ती) (१) काव्येन्दुप्रकाश[3] (२) रसनिर्णय (३) चम्पकमञ्जरी नाटिका (४) नरहरिविजयनाटकं (५) शृंगार-कलिका चेत्यादि ग्रन्थानां प्रणेता तत्सुतश्च हरदत्तापरनामधेयो ब्रजराजः—(१) रसमञ्जरी व्याख्या—(२) शृङ्गारशतक-(३) सद्रत्नवर्णन-(४) आर्यात्रिशती-मुक्तक-प्रभृतिग्रन्थानां निर्माता तथा तत्सूनुः श्रीमाधवसेननृपस्य सभापण्डितः श्रीजीवराजो[1]ऽभवत्। स च (१) गोपालचम्पू (२) भानुदत्तस्य रसतरङ्गिण्याः 'सेतु' नाम्नीं टीकां च निरमात्। एवं संस्कृतसाहित्य-संवर्धन-धौरेयवंशस्यास्य श्री-सामराजदीक्षितस्य स्थितिकालायेमानि तथ्यानि पुर आयान्ति—

(१) आनन्दरायभूपतेः स्थितिकालः सप्तदश्याः शत्या मध्यकाले मन्यते।

(२) 'श्रीदामचरित'स्य प्रस्तावनायां 'धूर्तनर्तक' स्योल्लेखो विद्यते।[2]

(३) 'श्रीदाम चरितं' च कविना १६८१ खिस्ताब्दे प्रणीतम्।

एतेषामाधारेणेदं निश्चीयते यद् श्रीसामराजस्य स्थितिः १६५५ खिस्ताब्दात् १७०० यावदभविष्यदिति।

श्रीसामराजदीक्षितस्य कृतयः

(१) धूर्तनर्तकम् (प्रहसनम्)

(२) श्रीदामचरितम् (नाटकम्)[3]

स्थित—श्रीजीमन्दिरे वसन्ति। तेषां समीपे श्रीसामराजदीक्षितप्रणीतः 'पूजा-रत्न' नामको ग्रन्थो विद्यते। यस्योपयोगस्तैर्नवरात्रदिनेषु पूजार्थं क्रियत इति प्रसिद्धिः।

१-अस्य ग्रन्थस्य (चौखम्बा संस्कृतग्रन्थमालायां ग्रन्थसंख्या १०० तमे) सम्पादन-मस्य प्रहसनस्य मूलसम्पादकप्राध्यापकश्रीबाबूलालशुक्लशास्त्रिभिरेव विधाय १६६६ ई० तमे वर्षे प्रकाशनं कृतमस्ति।

२-अत्र जीवराजस्य स्थाने 'ढुण्ढिराज' इति नामासीदिति श्रीमदमृतवाग्भवा-चार्याणां मतम्। मन्ये नामेदमुपनामापि स्यात्?।

३-नटी—(क्षणं स्मृत्वा) को से सामराओ जेण 'धुत्तणट्टअं' प्पहसणं कदुअ वअं णट्टाविदा। (कोऽसौ सामराजो येन 'धूर्तनर्तकं' प्रहसनं कृत्वा वयं नर्तापिताः?] इति।

४-इदं नाटकं 'शोधप्रभा'यां प्रकाशनाय वयमुत्सुकाः स्मः। श्रीशुक्लमहोदयैरस्य पाण्डुलिपिः सम्पाद्य प्रेषिता वर्तते। मन्येऽग्रिमाङ्कात् क्रमेण प्रकाशनं स्यादिति।

(३) त्रिपुरसुन्दरीस्तोत्रम्

(४) त्रिपुरसुन्दरीमानसपूजास्तोत्रम् [१]

(५) अक्षरगुम्फः ।

(६) आर्यात्रिशती ।

(७) शृंगारामृत-लहरी ।

(८) पूजारत्नम् ।[२]

एता अष्टौ कृतयः कवेरस्य प्रौढेन पाण्डित्येन सरसेन काव्य-कौशलेन च मण्डिताः सन्ति । मन्ये तदिदं भगवत्या उपासनाया एव सुपचेलिमं फलम् । अत एव सत्यमेवोक्तं धर्माचार्यापरनामधेयेन श्रीलध्वाचार्यचरणेन स्वस्यां 'पञ्चस्तव्यां' लघु-स्तवे—

वामे पुस्तकधारिणीमभयदां साक्षस्रजं दक्षिणे,
भक्तेभ्यो वरदानपेशलकरां कर्पूरकुन्दोज्ज्वलाम् ।
उज्जृम्भाम्बुजपत्रकान्तनयनस्निग्धप्रभालोकिनीं,
ये त्वामम्ब ! न शीलयन्ति मनसा तेषां कवित्वं कुतः ? ॥

कवेरस्य भागवतीभक्तिः सर्वत्र प्रस्फुरन्तीव विलोक्यते स्वयं चायं यत्र तत्र प्रकटयत्यपि । किञ्चास्य पाण्डित्यं प्रकृष्टतममासीदिति द्वयोरेव पूर्वोक्तयो रूप-कयोः प्रस्तावनांशाभ्यां ज्ञायते । यथा—'तर्ककर्कशजलधिकूलोत्तंसेन सरससाहित्यसुधा-सरोहंसेन सकलकलाभिज्ञेने,तिविशेषणैरात्मानं धूर्तनर्तकेऽयं परिचाययति ।[३] तथा च श्रीदामचरिते—

नटी—...तस्य पण्डितकवेर्मामपि सुखयति वाण्या गुम्फः ।

सूत्रधारः— प्रिये किं ब्रूषे मामपीति ।

४-इदं स्तोत्रं काव्यमालाया नवमगुच्छके १४० तमपृष्ठादारभ्य १५१ पृष्ठावधि सप्ततिपद्यात्मकं प्रकाशितं विद्यते ।

५-अयं ग्रन्थो मथुरायां पं० करुणाशंकरशर्मशास्त्रिणां सविधे विद्यत इति सूचना ।

१-तथा तत्रैव—

तन्वते निर्वृतिं यस्य वाचो लोकस्य कर्णयोः ।
रतिप्रमत्तवनिता-कङ्कणक्वाणमञ्जुलाः ॥ ३ ॥ इत्यपि पुष्णाति वचोमाधुरीमस्येति ।

वेल्लत्कल्लोलमालातटघटनमिलत्फेनसन्तानमूर्च्छत्,
क्षीरोदक्षोददीक्षावितरणपटवो यस्य वाचां प्रपञ्चाः।
केषां शेषाहिगौरा हृदयपटकुटीमेत्य साहित्यरज्यत्—
सौहित्यानां रसानां विदधति न भरैः पूर्णमानन्दसिन्धुम् ॥ ५ ॥

नटी— तादृश एव सः।

इत्येवंविधसंल्लापेन तदिदं स्पष्टीभवति।[1] एतादृशस्य पाण्डित्यसम्मण्डितस्य सुधारससम्भृतसूक्तिनिकेतनस्य महाकवेः श्रीसामराजदीक्षितस्य कृतेरास्वादने कस्य सचेतसश्चेतो न सतृष्णं भवेत् ?

प्रस्तुतं "धूर्तनर्तकम्" प्रहसनम्

इदं तु प्रथितमेवास्ति यत् 'प्रहसन-साहित्यस्य सृष्टिः किल समाजे प्रवर्तमानाया दुष्प्रवृत्तेः पर्यालोचनामधिकृत्य तदपनोदनाय साक्षात् किमपि न कथयित्वा केनाप्यन्येन माध्यमेन वास्तविकी स्थितिः पुरस्क्रियते तदा भवति।' अनयैव दृष्टयाऽस्यापि प्रहसनस्य सर्जनं महाकविना श्रीमता सामराजदीक्षितेन विहितमिति स्पष्टमेव।

अत्र प्रहसने द्वे सन्धी स्तः। नाटयशास्त्रीयानि लक्षणान्यनुसृत्य प्रथमं नान्दी-पद्ययुगलं प्रस्तुतम्। तत्रैव **'क्रीडन्नारीकदम्बे'** **'क्रीडत्कोकिलपोतराजि० हास्यं चक्रे'** इत्यादि पदैः सहैव **'मिथ्यावैराग्यदम्भं'** मिति पदेन स्वकृतेः प्रतिपाद्यमपि दीक्षितेन संसूचितमस्ति, किञ्च प्रस्तावनायां सूत्रधार-नटीयुगलस्य संवादेऽपि—**नरकेसरिणो यात्रायां परिमीलितेन धरित्रीसुत्राम्णां समूहेनादिष्टः** सूत्रधारो **हास्यरसभूयिष्ठेन रूपकेण** विद्वत्परिषदं तोष्टुकाममात्मानं **प्रकटयति'** ततोऽप्यस्य परिहासपेशलत्वं स्फुटमेव।

अत्र नाम्ना निर्दिष्टानां पात्राणां परिचयादप्यस्य प्रहसनतत्त्वं परिस्फुटं जायते, यथा—

"मूढेश्वरः, जगद्वञ्चकः, मुखरः, ब्रह्मानन्दस्वामी, पापः, शुण्ठाचार्यः, राजा पापचारः, निर्मर्यादश्रयस्तथा मञ्जुलकुठारमिश्र"श्चेति।

१-एवमेवास्य नाटकस्य पूर्तौ पुष्पिकायामपि—

पायं पायमिमां भजन्तु कवयो नैलिम्पवृत्तिं भुवि,
स्फीता दीक्षितसामराजविदुषः सूक्तीः सुधास्यन्दिनीः।
किञ्चाशावनिताकपोलफलके पाटीरपत्रावली-
लीलामञ्चतु कीर्तिरिन्दुजयिनीमावन्दरायप्रभोः ॥ ५।२५ ॥

सम्भूय षोडशसङ्ख्याकैः पात्रैरत्र श्रीदीक्षितः स्वीयं नाट्यप्रणेतृकलाकौशलं कवित्वनैपुण्यं च युगपदेव प्राचीकटत्।

कथावस्तु दृष्ट्याऽत्र प्रहसने—

मूढेश्वरो गुरुः स्वशिष्याभ्यां जगद्वञ्चक-मुखराभ्यां सहोद्यानं प्रविष्टो वसन्त-सुषमामाध्यमेन वसन्तलतां वारविलासिनीं स्मरति। तत्प्रेम च समुद्रजलग्रहणपूर्वकं शिष्याभ्यां शपथकरणोत्तरं तयोरग्रे शुण्ठाचार्याश्रमे जातमिति प्रकटयति। तत्रैव मूढेश्वरस्य मित्रं ब्रह्मानन्दस्वामी मिलति मिथो वार्तालापेन च सोऽपि पद्मानाम्नीं वारविलासिनीं प्रत्यनुरज्यतीति स्फुटं भवति। नेपथ्ये वसन्तलतामधिकृत्यैका गाथा गीयते यां श्रुत्वा मूढेश्वरस्तद्विरहतान्तो भवति। तदैव शुण्ठाचार्यः स्वशिष्येण नीलकण्ठेन सहायाति वसन्तलता च तत्रैव नृत्यन्ती विलोक्यते। ते सर्वेऽप्येकत्र स्थित्वा यावदालपन्ति तावदेव वसन्तलता ततो निर्गच्छति तां चानुगन्तुकामो मूढेश्वरो भवानीवल्लभपूजाया अग्रिम-सामग्रीसम्पादनव्याजेनानुसरति। अनुसृत्य च रजन्यां स्त्रीयं भवनं पवित्रयतुं प्रार्थयते। सा च कथमपि स्वीकरोति। तावदेव शुण्ठाचार्य आगत्य मध्याह्नभिक्षार्थं मूढेश्वरं नीत्वा गच्छति। एवं प्रथमः सन्धिः समाप्यते। द्वितीये च सन्धौ प्रदोषकाले मूढेश्वरो मनोजपञ्चबाणपीडितो वसन्तलतां प्रतीक्षते सा च यदा नायाति तदा तामानेतुं जगद्वञ्चकं प्रेषयति। स च वृद्धस्य गुरोस्तादृशीं स्थितिं दृष्ट्वा तं वञ्चयितुं गच्छति गत्वा च वसन्तलतां स्वयमेव रत्यै प्रार्थयते। विलम्बमसहमानो मूढेश्वरोऽपि तत्रैवायाति यत्र जगद्वञ्चको वसन्तलतया सहागच्छति स्म। मूढेश्वरो वसन्तलतां प्रियारूपेण सम्बोधयति तदा जगद्वञ्चकस्तां तवेयं स्नुषेति कथयति कलहश्च सम्पद्यते। तदा जगद्वञ्चकस्तं दण्डयितुं राजपुरुषानानीय राज्ञः पापचारस्य निकटे प्रापयति। राजाऽपि स्त्रीदर्शनोत्सुकस्तां वारविलासिनीं दृष्ट्वा मुह्यति तावत्सन्ध्यासूचना वैतालिकेन क्रियते। मूढेश्वरो भानुं प्रणमति तत्प्रणतिप्रक्रियां यवनसदृशीं विलोक्य विदूषकस्तं नामगोत्रादिभिः परिचिचिषति परस्परं च विवदतः। अवस्थानं च मूढेश्वरस्य निर्मेघाश्रम इति ज्ञात्वा च तस्यातिसत्कारं राज्ञा कारयति तदीयं विद्यावैशिष्ट्यं च पृच्छति। मूढेश्वरः 'सर्वं जानामि यत् पृच्छसि' इति कथयित्वा कौतूहलं दर्शयति। ततः परं निर्मेघाश्रम आयाति स च मूढेश्वरं तत्रागमनकारणं पृच्छति स च यथाघटितं वर्णयति। तावदेव मङ्गलकुठारमिश्र आगत्य स्वागमनकारणं निवेद्य राज्ञा सत्कृतस्तत्र कौतूहलं पश्यन् वसन्तलतां निर्वर्णयति तदा राजा तस्मै समर्पयितुमिच्छति। स हि तदनुचितं मन्वानः शुण्ठेश्वराभिप्रेतं राज्ञे प्रकटय्य मूढेश्वरायोपायनीकारयति इति।

वर्णन-सौन्दर्यम्—

यथा कविरात्मनो विषये सुधारसस्यन्दिनीनां वाचां व्यञ्जकत्वं प्रकटयति तथैवात्र प्रहसने गद्येषु पद्येषु च साफल्यं धारयति । सूत्रधारस्य वचनेषु प्रस्तावनायामन्यत्र दीर्घदीर्घसमासशालिगद्यव्यवहारः सानुप्रास-शब्दविन्यासश्च चूर्णकोत्कलिकाप्रायत्वेनोपन्यस्तः । अस्य पद्यरचनाऽपि तादृश्येव क्वचिद्दीर्घसमासगभीरा क्वचिच्च मृदुपदविन्यासपेशला लघु-लघुशब्दकूटसन्निहिता । प्राकृतभाषाया अपि प्रौढं वैदुष्यं कवेः । गद्ये पद्ये च समानगतिकः । छन्दसां प्रयोगनैपुण्यमस्य विभिन्न-प्रकारकवृत्तप्रयोगैर्ज्ञायत एव । मध्याह्नसायाह्नवर्णनयोः प्रस्फुरति महाकवित्वं श्रीदीक्षितमहाभागस्य । भाषा सर्वत्र शास्त्रसम्मता वर्णनोचिता च । हास्ये स्थलमेकं विहाय कुत्रापि न दृश्यतेऽश्लीलत्वम् ।

एवं कृतिरियं तनीयसी प्राथमिकी च सत्यपि कवेः सार्वत्रिकं वैदुष्यं सकलकलाभिज्ञत्वं स्वत एव समुद्भावयति रचनागतवैशिष्ट्येन च सर्वाणि प्राक्तनप्रहसनान्यतिशेते ।

प्रस्तुतं प्रकाशनम्

दिल्लीस्थ-श्रीलालबहादुर-शास्त्री-केन्द्रीय-संस्कृत विद्यापीठस्य त्रैमासिक्यां 'शोध-प्रभा' नाम्न्यां शोध-पत्रिकायां सङ्कल्पानुसारं पूर्वमप्रकशितानां लघु-ग्रन्थानां सम्पादनपूर्वकं प्रकाशनमभीष्टमिति कृत्वा विद्वद्भ्यो बिनिवेद्यत एव । प्राध्यापक-श्रीबाबूलालशुक्लशास्त्रिणः किल बहोः कालात् प्राचीनपाण्डुलिपीनां सङ्ग्रहणे समुद्धरणे सम्पादने च दत्तचित्ताः सन्तीति जानन्त्येव विद्वांसः । विद्यापीठस्य पूर्व-प्रकाशिताध्ययनमालायां 'राघवाह्निकं' गीतिकाव्यं तथा चौखम्बासंस्कृतग्रन्थमाला-वाराणसीत एतेषां बहवो ग्रन्थाः प्रकाशिताः सन्ति । दीक्षितश्रीसामराजस्य सूनोः कामराजस्य काव्येन्दुप्रकाशस्य यथोपलब्धांशं (चतुर्दश-पञ्चदशकला-युगलात्मकं) प्रकाश्य तत एव प्रेरिताः श्रीदीक्षितानां 'धूर्तनर्तक'मिदमस्मै मुद्रणाय प्रेषितवन्तः । विद्यापीठस्य प्राचार्याणां सम्मत्या विस्तृतोपोद्घातसंवलितमिदं मयेदं यथामति सुसंयोज्य प्रकटितम् ।

अत्र मूलग्रन्थस्य समानाकारक एवोपोद्घाते 'प्रहसन' रूपकाणां परम्परायाः पर्यालोचनं मयाऽऽवश्यकं मन्वानेन साहित्येतिहासग्रन्थेभ्यः पत्र-पत्रिकाभ्यस्तथार्वयवितक-परिचयद्वारा प्राप्तसूचनाभ्यः प्रहसनानां नामानि सङ्गृह्य यथालब्धं संक्षिप्तपरिचयं च प्रदाय विषयस्यास्यानुसन्धित्सूनां कृते मनाक् सौविध्यमापादितमिति तेभ्यो निश्चितं रोचेतैव ।

प्रकाशने यत्र तत्र मुद्रणदोषा अथवा मात्रादित्रुटिदोषाः केचन सन्ति तान्

विद्वांस: पाठका: संशोध्य लाभान्विता भवेयुरस्या रचनाया आस्वादनेन च प्रसीदन्त्विति सम्प्रार्थ्य प्राचार्य डॉ० सी० आर० स्वामिनाथमहोदयेभ्य: कृतज्ञतां सहयोगिभ्यो धन्यवादांश्च वितीर्य कामये यदनेन महाकवे: श्रीसामराजदीक्षितस्य कृतेर्यशो वितन्यादिति ।

निर्जलैकादशी
२०३५ वि०

विद्वच्चरणचञ्चरीक:
—डॉ० रुद्रदेव त्रिपाठी

श्रीसामराजदीक्षित-प्रणीतं

धूर्तनर्तकम्

[प्रहसनम्]

अथ प्रथमः सन्धिः

(नान्दी)

क्रीडन्नारीकदम्बे कलयति जगतामीश्वरे कंसशत्रौ,
मिथ्यावैराग्यदम्भं निखिलवरवधूदत्ततालं तथोच्चैः ।
हास्यं चक्रे कदाचिन्मधुभिदभिमतं पीतवस्त्रे च कर्षे,
जाते त्वित्थं मुरारिस्मितसुभगमुखः पातु युष्मान् स तस्मात् ॥ १ ॥

अपि च—

कालिन्दीपुलिने तमालमलिने भृङ्गैर्विहङ्गैर्युते,
क्रीडत्कोकिलपोतराजि[1] विलसत्कण्ठे मनोहारिणि ।
अर्धग्रस्तशशाङ्कवन्निजमुखे राधाधरं धारयन्,
गोपीभिः परिवेष्टितो भवतु वो भव्याय नव्याकृतिः ॥ २ ॥

(नान्द्यन्ते)

सूत्रधारः —(सर्वतोऽवलोक्य[2]) अहो ! अद्य तावद् वन्दारुवृन्दारकवृन्दमौलिस्खलन्मन्दमन्दारप्रसवमकरन्दसन्दोहामोदितपादकुसुमस्य अतिविकटसटाकोटिकोटिपाटितनीरधरोदरस्खलन्नीरपीवरितावनीरुहप्रसवविभूषितोत्तमाङ्गस्यातिखर - नखरसरदा[3]वेशविदारित - दर्पोद्दीर्णहिरण्यकशिपूदरदरीजृम्भमाणान्त्रसन्तानशोभिताङ्गस्य दैत्यकरिकेसरिणो नरकेसरिणो यात्रायां परिमीलितेन निखिलकलाकोविदेन धरित्री-

---

१. पोतराज. B.। २. विलोक्य-B.। ३. सरदावे विदा- B.।

सुत्राम्णां समूहेनाहमुक्तः, यद् दीक्षितनरहरिकुलावतंसेन तर्ककर्कशजलधिकुम्भकूलोत्तंसेन सरस-साहित्यसुधासरोहंसेन सकलकलाभिज्ञेन **दीक्षितसामराजा**भिधानेन विरचितं **'धूर्तनर्तकं'** नामापूर्वं प्रहसनं तन्नाट्यतामिति। तद्यावदहमपि अस्याश्चित्तानन्दाय भवनमुपसृत्य भामिनीमाहूय सह कुशीलवैस्सङ्गीतकमनुतिष्ठे इति। (नेपथ्याभिमुखमालोक्य) इदमस्मद्भवनद्वारम्। यावत् प्रविशामि। (प्रविश्योच्चैः) भामिनीतस्तावत्।

नटी —(प्रविश्य) अज्ज, को णिओओ अणुचिट्ठीअदु त्ति आणवेदु अज्जो। [आर्य, को नियोगोऽनुष्ठीयतामित्याज्ञापयत्वार्यः।]

सूत्रधारः —आर्ये, हास्यरसभूयिष्ठेन रूपकेण तोषणीयेयं विदुषां परिषत्।

नटी —अज्जउत्त, कीरिसं ता रुवअं। को उण तस्स कइ ?
[आर्यपुत्र, कीदृशं तद्रूपकम्। कः पुनस्तस्य कविः ?]

सूत्रधारः —आर्ये, अस्मिन् विषयेऽप्यनभिज्ञासि। पश्य—

तन्वते निर्वृतिं यस्य वाचो लोकस्य कर्णयोः।
रतिप्रमत्तवनिताकङ्कणक्वाणमञ्जुलाः॥ ३॥

अपि च—

नरहरिकुलाब्धिचन्द्रो नरहरिमान्यो हि सामराजो यः।
नरहरिवन्द्यतनुश्रीर्नरहरिचरणाब्जरोलम्बः॥ ४॥

तेन कविना विरचय्य मय्यनुनयेन **'धूर्तनर्तकं'** नाम प्रहसनं प्रत्यर्पितम्।

नटी— ता कं उण उदं अहिकरिअ गाइस्सं ? [तत् कं पुनः ऋतुमधिकृत्य गायिष्ये ?]

सूत्रधारः —कान्ते, अमुमेवाचिरप्रवृत्तमभिनवचूतमञ्जरीरेणुपिञ्जरीकृतेन्दिन्दिरसुन्दरीनिकरविरावापूरिताशाविसर- मत्तकलकण्ठकलापकलकलकलपूरितहरिदन्तरालं सुरभिसमयमभिगीयताम्।

इह हि—

सुरतचतुरनारी स्वेदनीरापहारी,
जनगणसुखकारी पान्थवर्गापकारी।

जलधितटविहारी[1] चन्दनामोदहारी,
वहति विरहिमारी[2] मारुतः पद्मसारी ॥ ५ ॥

नटी— (गायति)

माणिणिमाणविलुंपअओ णच्चिदचूअअचंपअओ ।
लाड[3]वहूअकटच्छचअं विरहिवहूजणता[4]वणओ ॥
रइवअण रवइ जेत्तरवो वाइअ (वाअइ) चंदणगंधवहो ॥ ६ ॥]
[मानिनिमानविलुम्पक नर्तित-चूतकचम्पककः ।
लाटवधूककटाक्षचयो विरहिवधूजनतापनकः ॥
रतिवचनं रौति जैत्ररवो वाति च चन्दनगन्धवहः ॥ ६ ॥]

सूत्रधारः —

एतत्ते गीतमाकर्ण्य चित्रितेवाखिला सभा ।
विभाति खलु निश्चेष्टा जिह्वा[5]यन्त्रणमञ्जुला ॥ ७ ॥

(नेपथ्ये)

वामाराधनतत्परकरणः शिष्यसुपूजितमञ्जुलचरणः ।
करकलितासममस्करदण्डः पण्डितमण्डलनागरतुण्डः ॥ ८ ॥

नटी —अज्जउत्त, को एसो रुद्दक्खलक्खभूसिदसिरोदेसो पेसलवेसो फडिअभूसिदजडाकण्णकंठकुप्परो रक्खोवलक्खिदगत्तणिअरो णच्चदो विअ इदोज्जेव्व आअच्छदि ? [आर्यपुत्र, क एष रुद्राक्षलक्षभूषितशिरोदेशः पेशलवेषः स्फटिकभूषितजटाकर्णकण्ठकूर्परः रक्षोपलक्षितगात्रनिकरो नृत्यन्निवेत एव आगच्छति ?]

सूत्रधारः —(विलोक्य)

कषायप्रावारोल्लसदतुल-भस्माकुलवपु—
स्त्रिपुण्ड्राक्षाभ्यां यः कलयति गिरीशस्य सुषमाम् ।
जटाधारी मा[6]नानुसरणपरीरब्धहृदयो—
दयो रक्षागोलं कलयति च कक्षापुटतटे ॥ ९ ॥

(विभाव्य) आः ज्ञातम् ।

वाराङ्गनाभोगविलासनागरः,
समातुलानीरससारसागरः ।

---

१. निहारी-B. २. नारी-B. ३. ताडवहूकअणच्चणओ. B.
४. तोवणओB.। ५. यन्त्रेण. B.। ६. नामानु- B. ।

वामोल्लसत्पादसरोजषट्पद-
स्स एष मूढेश्वर एत्यलम्मदः ॥ १० ॥

तदेतस्य पापस्य दर्शनमपि दूरतः परिहरणीयमिति ।

(निष्क्रान्तौ)

प्रस्तावना

—०—

(ततः प्रविशति शिष्याभ्यां सह यथानिर्दिष्टो मूढेश्वरः)

मूढेश्वरः—पुरतो अवलोक्य

चिन्तयन्ति हि सदा मुदा हृदा,
यं वदान्यमिति योगिनो धियः ।
शङ्करं सकललोकशङ्करं,
चेतसा समभिभावयामहे ॥ ११ ॥

अपि च—

हृदयस्थापितविनयं[1] वीक्ष्येर्ष्यासङ्कुला शिवं[2] गौरी ।
कुरविन्दा[3]यितनेत्रा मन्थरगात्रा चिरं पातु ॥ १२ ॥

जगद्वञ्चकः—भोः गुरुदेव, मुनिजनस्याधीरत्वगर्वमवधीरयति निखिलकुसुमपरागसुरभिः सुरभिः ।

यश्च—

पिकावलीकूजितपूरिताशो,
वियोगिसन्देहितजीविताशः ।
वसन्तवल्लीमकरन्दबिन्दु-
सन्दोहसन्तोषितषट्पदौघः ॥ १३ ॥

मूढेश्वरः—वत्स जगद्वञ्चक, वसन्तवल्लीत्यनेन तद्बोधितम् । (**इत्यर्धोक्त्या । आत्मगतम्**) बर्बरौ खलु बटू तदिदं नाभिधास्ये ।

मुखरः—भो गुरुदेअ, तं उण किं ? [**भो गुरुदेव, तत् पुनः किम्** ?]

जगद्वञ्चकः—वसन्तवल्ल्या किमनुबोधितम् ?

मूढेश्वरः—वत्सौ शृणुत । यदि युवां तरलतरवीचिनिचयोद्धतशीकरशीतलिततटस्य जलधेर्जलमादाय शपथं कुरुतं तर्ह्यभिधास्ये ।

---

१. विजयं-B.। २. शिवा-B.। ३. न्दायतनेत्रा-B. ।

उभौ —ओम् इति ।

(सर्वे परिक्रामन्ति)

मूढेश्वरः —वत्स जगद्वञ्चक, पश्य । अनेनैव पथा दाशरथिर्नवजलधराभिरामो रामोऽभिससार निखिलजगद्विद्रावणरावणान्तकरणाय ।(पुरतोऽवलोक्य) वत्सौ, सैवेयं लङ्काऽलङ्कारो भूवलयस्य ।

यस्याञ्च —

निजमुखजितचन्द्रः सायकै रामचन्द्रः,
स्वभुजजबललोकद्रावणं रावणं तम् ।
महिषगमनहर्म्यं या[४]पयामास शश्वत्,
तदनुजमनुचक्रे राक्षसानामधीशम् ॥ १४ ॥

(किञ्चिद् गत्वा विलोक्य च) वत्सौ, इतस्तु सन्निहित एव मलयमहीधर इति जानीमहे । यतः—

चन्दनामोद-सन्दोहवाहिको हि सदागतिः ।
याति मन्दगतिः सर्पवधूकवलनादिव ॥ १५ ॥

(अग्रतो विलोक्य)

अये भगवतो महर्षेर्वातापितापनस्याश्रमः । अयं हि—

पटुतरबटुचाद्वद्घोषणानां विरावै-
श्चपलचटकचञ्चच्चञ्चरीकानुशब्दैः ।
तरुशिखरनिषक्तैर्वल्कलैरार्द्रगात्रै—
रनुहरति मनो मे शाखिनां पुष्पवृन्दैः ॥ १६ ॥

(पार्श्वतोऽवलोक्य) स एष जलधिरुद्दामवीचिवाचालवेलः । तदेहि शपथकरणाय । (इति सर्वे परिक्रामन्ति)

मुखरः —(अपवार्य जगद्वञ्चकं प्रति) भो जेट्ठ, पेख्ख पेख्ख । एसो अह्माणं गुरुदेओ मीलंतलोअणजुअलो किं पि किं पि आलवंदो साअरतडं अदिक्कम्मेति । ता ख्खु णं किं वि भासेसु । [**भो ज्येष्ठ, पश्य पश्य । एषोऽस्माकं गुरुदेवो मीलितलोचनयुगलः किमपि किमप्यालपन् सागरतटमतिक्राम्यति । तत् खलु एनं किमपि भाषयिष्यावः ।**]

---

४. प्रापयामास-B.।

जगद्वञ्चकः —एष स्मेराननमाकरोमि। (मूढेश्वरं प्रति) ज्वरजर्जरा मे शरीरयष्टिस्तत् किं करोमि।

मूढेश्वरः —(विहस्यात्मगतम्) चेष्टते खल्वेषः। (प्रकाशम्) वत्स, इदं गृहाण। (इति कक्षात उभयोर्हस्ते ददाति)

(जगद्वञ्चकः हस्ते गृहीत्वा विलोक्य विहस्य च मुखे निक्षिपति।)

मुखरः —भो गुरुदेअ, किं एवं नीललोहिदकंठचुण्णसरिच्छं ण दावणं भक्खिस्सं। [**भो गुरुदेव, किमेतद् नीललोहितकण्ठचूर्णसदृशं, न तावद् एनं भक्षयिष्यामि।**]

मूढेश्वरः —

नाशनं खलु शोकानां शक्रासनमिदं परम्।
गदकूटहरं पश्य नेत्ररागानुकारणम्॥ १७॥
पीयूषं[1] जम्भभेदीशमनपदतुलस्वादुगीर्वाणलोके,
तद्बिन्दुक्षोणिपृष्ठे न्यपतदभिमतः पन्नगानां गणस्य।
तस्माच्छक्रासनं किं समजनि जनताः सर्वरोगप्रहाणं,
निर्व्याजं शर्मकारि द्रुतमथ वशमेत्युत्पलाक्षी सहस्रम्॥ १८॥

मुखरः —जा एव्वं ता भक्खिस्सं। [**यद्येवं तदा भक्षयामि**] (इति मुखे निक्षिप्य अक्षिणी निमील्य रसमास्वाद्य च) भो गुरुदेअ, कसाइदा मे जीहा। पज्जलइ गलो ता किं कादव्वं ?। [**भो गुरुदेव, कषायिता मे जिह्वा। प्रज्वलति गलस्तत् किं कर्तव्यम् ?**]

मूढेश्वरः —निखिलनदीपतेः सागरस्य जलं पीयताम्।

मुखरः —(तथा कृत्वा क्षारतास्वादमभिनीय च) गुरुदेअ, दंसोवरि दंसो संवुत्तो। [**गुरुदेव, दंशोपरि दंशः संवृत्तः।**]

जगद्वञ्चकः —शपामि गुरुदेवस्य चरणाभ्यां यदि वक्ष्यमाणां वार्तां कस्याप्यग्रे कथयिष्ये। (इति मूढेश्वरस्य पादे जलमुत्क्षिप्य नमति।)

मूढेश्वरः —वत्स, त्वमपि कुरु।

मुखरः —ण जाणे सवहं कादुं। कहं उण करीअदि ? [**न जाने शपथं कर्तुम्। कथं पुनः क्रियते ?**]

---

१. जप्त तप्त दीसवनदयेयदतुलस्वादु-**A.**।

मूढेश्वरः —यथा वृत्तं जगद्वञ्चकेन ।

मुखरः —जइ एव्वं ता अहिअं किं वि करिस्सं [यद्येवं तदाऽधिकं किमपि करिष्ये ।] (इति जलमादाय) सवामि गुरुदेअस्स चलणेहिं जइ पुणो वि गुलुदेअस्स कहिस्सं । [शपामि गुरुदेवस्य चरणयोः यदि पुनरपि गुरुदेवस्य कथयिष्ये ।] (इति पादयोः पतति)

मूढेश्वरः —वत्सौ, श्रूयताम् । अद्यतः पञ्चदशदिनपूर्वां (दिनं)[1] गतायां चतुर्दश्यां शुण्ठाचार्यस्यान्तर्भवनमनुगतोऽहं भगवतो भवानीवल्लभस्य पूजायै, तत्र च निजतनुविश्रीकृतहारिद्रा निजवर्णककविमुख[2]वृतमुद्रा विद्रावितनिखिलनरनिद्रा विलासिनी—

गोकर्णतर्णक-विलोल-विलोचना सा,
नासापुटेन च तिरस्कृतकामभस्त्रा ।
कामैककार्मणिककार्मणमञ्जुगात्रा,
नेत्रातिथिर्मम बभूव निशेशवक्त्रा ॥ १९ ॥

तद्दिनमारभ्य पञ्चेषुपञ्चेषुतूणीरान्तःकरणस्तूष्णीमुपतिष्ठामि । तदागच्छतामद्यापि नरीनृत्यन्ती वरीवर्ति मे सुन्दरी । तामुद्वीक्ष्यानन्दकन्दलीकलितस्वान्तः सुखतरङ्गिणी-प्रेङ्खत्तरङ्गावलीसमवलीढः स्थास्ये । (इति सर्वे निष्क्रामन्ति)

(नेपथ्ये)

तिष्ठ, मूढेश्वर क्व यासि ? मां मिलित्वाऽग्रतो गच्छ । (सर्वे सभयमवलोकयन्ति ।)

जगद्वञ्चकः —भो गुरो, क एष वैशाखनन्दन इव धूसराङ्गरुहो दृश्यते ।

मुखरः —सच्चं । को एसो उद्दतबाहुदंडओ किलकिलाअंतो साहसिओ विअ इदोज्जेव्व आअच्छेदि । [सत्यम् । क एष उद्धतबाहुदण्डः किलकिलायन् साहसिक इव इत एवागच्छति ।]

मढेश्वरः —(विभाव्य) एष ब्रह्मा[3]नन्दस्वामी शिष्येण सहोपैति ।

१. पूर्वं यातायां-B.। २. कृतमुद्रा-B.। ३. कृष्णानन्द-B.।

तदेतस्य न्यग्रोधस्यच्छायायां मलयानिलवीज्यमानगात्रा एवोपतिष्ठामः। (त था कृत्वा पवनस्पर्शसुखमनुभवन्ति।)

मुखरः — गुरुदेअ, केअइकुसुममअरंदमिलिदचंदणरेणू गंधवहो सुहअदि कण्णाइं[1]। [गुरुदेव, केतकीकुसुममकरन्दमिलितचन्दनरेणुर्गन्धवहः सुखयति कर्णौ।]

(ततः प्रविशति यथानिर्दिष्टः ब्रह्मानन्दस्वामी[2])

ब्रह्मानन्दस्वामी —[सगर्वं स्वगतम्) मत्तोऽपि कः सौन्दर्यमनुधत्ते। यत—

मां दृष्ट्वामरनरपन्नगाङ्गनानां,
प्रीतीनामविकलमेकपात्रमाशु ।
कन्दर्पो निशिततरैः शरैर्जितश्री—
र्मद्गात्रैः प्रहरति वीतगात्र एषः॥ २०॥

तद् भवतु। सखायं मूढेश्वरं मिलित्वा यथोचितमनुतिष्ठामि। (प्रकाशम्) वत्स पाप, कुत्रास्ते वयस्यो मे मूढेश्वरः।

पापः —ण आणे सो तुह्माणं पिअवअस्सो मूढेसरो कहिं गदो त्ति। [न जाने स युष्माकं प्रियवयस्यो मूढेश्वरः क्व गत इति।]

ब्रह्मानन्दस्वामी —(सर्वतोऽवलोक्य) एषोऽस्माकं प्रियवयस्यो न्यग्रोधपादपाधः सहान्तेवासिभ्यां किमपि मन्त्रयन्नुपविष्ट आस्ते। तद्यावदुपसर्पामि। (उपसृत्य) (नाट्येन सर्वे उपविशन्ति)

मूढेश्वरः —अपि कुशली भवान् सशिष्यः।

ब्रह्मानन्दस्वामी —अधुनैव भवद्दर्शनपूतस्य कुतो न शर्मसम्भाराः। (गर्वमभिनीय 'मां दृष्ट्वेति' (१/२०) पुनः पठति। जगद्वञ्चकमुखरौ सतालहस्तमुच्चैर्हसतः।)

ब्रह्मानन्दस्वामी —(विहस्य) इमौ कौ ?

मूढेश्वरः —शिष्यौ।

ब्रह्मानन्दस्वामी—त्वादृशौ स्तः।

मूढेश्वरः —ततोऽप्यधिकौ।

(सर्वेऽपि परस्परं हसन्ति)

मूढेश्वरः —(पापं निर्दिश्य) वयस्य क एषः ?

ब्रह्मानन्दस्वामी —प्रियान्तेवासी।

मूढेश्वरः —किं जातीयः ?

---

१. करणाई-B.। २. कृष्णानन्द B.।

ब्रह्मानन्दस्वामी— कुविन्दः ।

मूढेश्वरः —वयस्य, अन्येऽप्यन्तेवासित्वेनाचरिताः केऽपि ।

ब्रह्मानन्दस्वामी —बहवः । का खलु तत्र वार्ता । पश्य—

यवन-शूद्र-कुलाल-कुविन्दको—
द्भूट-कृषीवल-गोपक-शौण्डिकाः ।
अगणिता गमिकाः परिलम्भिताः,
श्रवणमूलजपान्निजशिष्यताम् ॥ २१ ॥

मुखरः —रे गव्वसील, अह्माणं वि गुलुचलणेहिं सिस्साणं कोडिओ किदा । ता किं णिमित्तं मुक्ख गव्वं उव्वहेसि ? [**रे गर्वशील, अस्माकमपि गुरुचरणैः शिष्याणां कोटिः कृता । तत् किं निमित्तं मूर्ख गर्वमुद्वहसि ?**]

ब्रह्मानन्दस्वामी —सत्यमेष मुखरः ।

मूढेश्वरः —पूर्वमित्रमपूर्वदर्शनोऽस्माकं ब्रह्मानन्दस्वामी । तदलमनेन मुधा मुखचापलेन ।

मुखरः —जइ एव्वं ता अह्माणं दुदीओ गुरुदेओ जेव्व संवुत्तो । ण कहिस्सं दाव । एस प्पणमामि । [**यद्येवं तर्ह्यस्माकं द्वितीयो गुरुदेव एव सम्प्राप्तः । न कथयिष्ये तावत् । एष प्रणमामि ।**]

ब्रह्मानन्दस्वामी —अभीष्टलाभी भूयाः । (विलोक्य । विहस्य च) यत् स मर्कट इवाकलयते चेष्टया ।

मुखरः —अहं मक्कडो व्व तुमं उण मक्कडो ज्जेव्व । [**अहं मर्कट इव त्वं पुनः मर्कट एव ।**]

ब्रह्मानन्दस्वामी —क्व प्रणामः क्व पुनः मुखचापल्यम् ।

मुखरः —णेदं मुहचावल्लं चेट्ठा । [**नेदं मुखचापल्यम्, चेष्टा ।**]

ब्रह्मानन्दस्वामी —का पुनर्गुरूणां चेष्टा ?

मुखरः —ण आणासि सुत्तं पि । [**न जानासि सूत्रमपि ।**] (संस्कृतमाश्रित्य) 'गुरुणाऽपि समं हास्यं कर्तव्यं कुटिलं विना' ।

पापः —कहं रे अह्माणं पि गुलुचलणेहिं चेट्ठा ! [**कथं रे, अस्माकमपि गुरुचरणैश्चेष्टा ।**]

मुखरः —ण जाणासि रे, जहा तुह गुरु तहा मह वि संवुत्तो । [**न जानासि रे, यथा तव गुरुस्तथा ममापि संवृत्तः ।**]

(पापः मुखरोपरि चपेटं ददाति मुखरः प्रतिकूलं ताडयति । उभौ परस्परं युद्धयतः । मूढेश्वरब्रह्मानन्दौ वारयतः ।)

ब्रह्मानन्दस्वामीः —तिष्ठतु । भवान् इदानीं क्व प्रस्थितः ?

मुखरः —अह्माणं गुरुदेअस्स एक्का वारविलासिनी चिट्ठदि । तहिं अह्माणं गुरुदेओ गमिस्सदि । [**अस्माकं गुरुदेवस्य एका वारविलासिनी तिष्ठति । तत्रास्माकं गुरुदेवो गमिष्यति ।**]

ब्रह्मानन्दस्वामी —वयस्य, सत्यं त्वय्यनुरक्ता । (मूढेश्वरस्तूष्णीमास्ते)

मुखरः —ण आणे तं विहिणो णिम्माणं कुसुमाउहस्स अपुव्वं कम्मणं दाडिमीबीअ-सोहि-रअणं इत्थिआ-रण्णं अह्माणं गुरुदेअम्मि अणुरत्तं ण वेति गुरुदेओ जेव्व पुच्छीअदु । [**न जाने तद्विधेर्निर्माणं कुसुमायुधस्यापूर्वं कार्मण्यं दाडिमीबीजशोभिरदनं स्त्रीरत्नमस्माकं गुरुदेवेष्वनुरक्तं न वेति गुरुदेव एव पृच्छयताम् ।**]

(मूढेश्वरः सक्रोधमक्ष्णा तर्जयति ।)

जगद्वञ्चकः —वत्स मुखर, शपथे वृत्तेऽपि कोऽयं ते दुराचारपरिग्रहः । यद्गुरुं गुरुकोपमुत्तालयसि ?

मुखरः —भो जेट्ठ, किं अह्मेहिं अणुट्ठिदं । अस्स भक्खिदविवेअस्स गुरुदेअस्स एण्हिं तुम्हि को भोदि सवहो वि मे वट्टदि । जइ एदस्स अग्गदो कहिस्सं तहिं मे सवहभंगो । अहं उण अण्णस्स अग्गदो भासेमि । [**भो ज्येष्ठ, किमस्माभिरनुष्ठितम् । अस्य भक्षितविवेकस्य गुरुदेवस्य इदानीं त्वपि को भवति शपथोऽपि मे वर्तते । यद्येतस्याग्रतः कथयिष्ये तदा मे शपथभङ्गः । अहं पुनरन्यस्याग्रतो भाषयामि ।**]

मूढेश्वरः —वयस्य ब्रह्मानन्द, त्वं पुनः कुत्र प्रस्थितः ?

ब्रह्मानन्दस्वामी —वयस्य, त्वमादौ स्वमुखादभिधास्यसि तदा कथयिष्ये ।

मूढेश्वरः —एष कथयामि । शृणु—

वसन्तलतिकाविद्ध[1]मनो भृङ्गानुहारिणी ।
बाला शरद्घनालीव मुमोच न च जीवितम् ॥ २२ ॥

तद्दि[2]नादारभ्य पीडित एव वसन्तदिनमनुभवामि ।

---

१. विद्धन्-B.। २. द्दिनमारभ्य-B.।

तदितः कथय त्वमपि निजोदन्तम् ।

ब्रह्मानन्दस्वामी—ममाप्येकास्ति पद्माभिधाना वारविलासिनी । तत्राहमपि गच्छामीति । (इति सर्वे परिक्रामन्ति)

(नेपथ्ये)

चक्कंगसत्थरम्मे सरोवरे उह हंसवहू ।
कंतविरह अविसूरंतहिअआ हिंडइ पोम्म[3]वणे ॥ २३ ॥
[चक्राङ्गसार्थरम्ये सरोवरे पश्य हंसवधूः ।
कान्तविरहखिद्यमानहृदया चरति पद्मवने ॥]

(सर्वे कर्णं ददति)

मुखरः—भो गुरुदेअ, किं वण्णणिज्जं । सुणु—

सद्दो सो णेउराणं परिअणरसिदं मद्दलुद्दामसद्दो,
तालाणं णिम्मलाणं झणझणरसिदं णाइआए अ गीदि ।
एक्कीभूदं अ सव्वं सअणपु[4]हमदं पप्फुडं अक्खरं ता,
गीदीए किं वि आणे पढणपडुदरा का वि सत्ती अ तीए ॥ २४ ॥
[भो गुरुदेव, किं वर्णनीयम् । शृणु—

शब्दोऽसौ नूपुराणां परिजनरसितं मर्दलोद्दामशब्दः,
तालानां निर्मलानां झणझणरसितं नायिकायाश्च गीतिः ।
एकीभूतञ्च सर्वं श्रवणपुटगतं प्रस्फुटमक्षरं तद्,
गीतस्य किमपि जाने पठनपटुतरा काऽपि शक्तिश्च तस्याः ॥

मूढेश्वरः—सैवास्माकं मनश्चन्द्रिका वसन्तलतिका ।

मुखरः—इच्छिआ उण किं भोदि । [इच्छिता पुनः किं भवति]

मूढेश्वरः—वत्स, अधुनैव त्वयोपवर्णितं पुनः पृच्छ्यसे ।

मुखरः—सुदं क्खु वण्णीअदि अ । [श्रुतं खलु वर्ण्यते च]

मूढेश्वरः—(विचिन्त्य) अयं गाथार्थो ममोपरि सरतीति जानामि यन्मद्विरहतान्ता वसन्तलता भविष्यति । (इति दवथुमभिनीय निःश्वस्य च)

अहोरात्रमहो कान्ताविरहो दुस्सहो मम ।
बाधते भानुचन्द्राभ्यां द्विगुणीकृतविग्रहः ॥ २५ ॥

---

३. पोन्मरणे (?)- B. । ४. पहुगदं-B. ।

(विलोक्य) एष शुण्ठाचार्यो नीलकण्ठपुरतस्तिष्ठति । (नृत्यन्तीं वसन्तलतामवलोकयन्) एषा च परिषद् । भवतु । यावदुपसर्पामि । (सर्वे उपविशन्ति । ततः प्रविशति यथानिर्दिष्टः शुण्ठाचार्यः ।)

शुण्ठाचार्यः —(मूढेश्वरं विलोक्य उत्थाय च) नाम भण । (सर्वे उत्थाय नाम भणन्ति यथोचितमुपविशन्ति च)

मुखरः —भो गुरुदेअ, इच्छिआ णं माणुसी एव्व भोदि । अहं उण जाणाभि रक्खसकुडंबिणी । [**भो गुरुदेव, इच्छिता ननु मानुष्येव भवति । अहं पुनर्जानाभि राक्षसकुटुम्बिनी ।**]

मूढेश्वरः —वत्स, एषैव स्त्री । (विलोक्य) कथमेषा योषा शेषावयवैस्तोषयति । अस्याश्च—

धाता पीयूषचन्द्रोज्ज्वलजलजलसत्सारपूरैः कृशाङ्ग्या,
वक्त्रं चक्रे शरीरं कनकगिरिदरीचारुचामीकरौघैः ।
श्वासं पाटीरवातैः कुचयुगसुषमां मत्तमातङ्गगण्डैः,
पाण्योर्मां पल्लवौघैरधरतललसन्माधुरीं तां सुधाप्तिः[1] ॥ २६ ॥

जगद्भक्षकः —(विलोक्य)

साफल्यमद्य जनुषो मम चक्षुषोऽपि,
दृष्टा यतो भवति तोयजमालिकेयम् ।
यस्याश्च वक्त्रकुचपाणिपदारविन्द—
मध्ये स्थितं तरलवन्नवनाभिचक्रम् ॥ २७ ॥

मुखरः —(सनिःश्वासं तापमभिनीय)

विज्जुरिल्लकरणअच्छगत्ता,
पप्फुरंतणववारिअणेत्ता ।
जं णिवस्सइ सरेहिं किसंगी,
तं वि आणइ रईसरसंगी ॥ २८ ॥
[**विद्युत्करणस्वच्छगात्री प्रस्फुरन्नववारिजनेत्री ।**
यं निबद्ध्य शरैः कृशङ्गी तं विजानीहि रतीश्वरसङ्गी ।]

जगद्भक्षकः —भो गुरुदेव, पश्य ।

सौदामिनीव सहसाम्बरमाविधूय,
शातोदरी सपदि सौधमुपाजगाम ।

---

१. सुधाभिः B.

मूढेश्वरः —(विलोक्य निःश्वस्य च) वत्स, न केवलं वस्त्रं विधूय गता ।
चञ्चच्चलन्नयनमाशु च मामकीनं,
गाढं निखाय हृदयं नयनान्तपातैः ॥ २६ ॥
तद् भवतु । अनुगच्छामि । (इति उत्थाय गन्तुमिच्छति)

शुण्ठाचार्यः —क्व पुनर्गन्तुमीहितं भवता ?

मूढेश्वरः —भगवतो भवानीवल्लभस्य सपर्यापर्याकुलस्य भवतोऽग्रचां सामग्रीं सम्पादयितुम् ।

शुण्ठाचार्यः —तत् सपदि सम्पादय ।

मूढेश्वरः —तथेति । (इति शिष्याभ्यां सह निष्कान्तः)

मुखरः —भो गुरुदेअ, पेख्ख पेख्ख । एसा किं वि किं वि चिंतअंती तुह विरहखिण्णहिअआ चिट्ठदि वसंदलदिआ । [**भो गुरुदेव, पश्य पश्य । एषा किमपि किमपि चिन्तयन्ती तव विरहखिन्नहृदया तिष्ठति वसन्तलतिका ।**]

मूढेश्वरः —कथमेषा प्रिया ह्रियाऽवनतमुखी तिष्ठति । भवतु । यावदुपसर्पामि । (उपसृत्य) प्रिये वसन्तलतिके,

वसन्तलतिका —(स्वगतम्) एसो वुड्ढो जडिलो उण मूढेसरो । [**एष वृद्धो जटिलः पुनः मूढेश्वरः**]

मूढेश्वरः— किं वदति मम प्रियतरोऽतितरां शिरीषमृद्वी मृद्वीकामृद्वीभिः गीर्भिः । (किञ्चिदवलोक्य । सरभसमुपसृत्य) प्रिये वसन्तलतिके, ननु न जानासि यदियं मत्कृत इयतीं वेदना(मनु)-प्राप्नोति ।

वसन्तलतिका — णं जाणामि । सव्वं अज्ज अज्ज, रमणिज्जं । [**ननु जानामि । सर्वमद्य आर्य, रमणीयम् ।**] (इति कामावस्थया वाक्-स्तम्भमभिनयति ।)

मूढेश्वरः—(सहर्षम्) किमद्य रजनीमधिकृत्य यास्यसि मद्भवनं पवित्रयितुम् ।

वसन्तलतिका — णहि णहि अज्ज, अज्ज रअणिम्मि खम्मेहि दाव । अहं उण सच्चं वदेमि । दुदीअदिअसरअणम्मि आआमिस्सं । [**नहि नहि आर्य, अद्य रजन्यां क्षमस्व तावत् । अहं पुनः सत्यं वदामि । द्वितीयदिवसरजन्यामागमिष्यामि ।**]

मूढेश्वरः—(सविषादं कामावस्थां नाटयन्) सुन्दरि, किं ब्रवीषि। वद तावत्

क्षणो वर्षायते बाले क्षपयामि कथं क्षपाम्।
नीहारकरदावाग्निकलितां [1]तुलयानि वा॥ ३०॥

मुखरः—(आत्मगतम्) अज्ज वि एदस्स बुड्ढजडिलस्स इच्छिदाए इच्छा ण णिविट्टेदि। (प्रकाशम्) वसंदलदिए, सच्चं अह्माणं गुरुदेओ तुमं जेव्व चिंतअंतो गलिदच्छि दिउणिअ-मंसो ईरिसो जादो ता अणुकंपेहि णं। [**अद्याप्येतस्य वृद्धजटिलस्य इच्छिताया इच्छा न निवर्तते। (प्रकाशम्) वसन्तलतिके, सत्यमस्माकं गुरुदेवस्त्वामेव चिन्तयन् गलिताक्षो द्विगुणितमांस ईदृशो जातः। तदनुकम्पयैनम्।**]

मूढेश्वरः—आः पापस्य सर्वत्र मुखरता। (वसन्तलतामुद्दिश्य) जीवयैनमद्यागमनेन।

वसन्तलतिका—जं भवं आणवेदि। [यद्भवानाज्ञापयति] (जगद्वञ्चकः ग्रन्थिं दर्शयति मूढेश्वरः उत्थाय नृत्यति।)

मुखरः—भो गुरुदेअ, को एसो चंदणभूसिदकलेअरो मोलंतेहिं अच्छीहिं किंवि चिंतअंतो इदो ज्जेव्व आअच्छदि। ता आलोएहि णं। [**भो गुरुदेव, क एष चन्दन-भूषितकलेवरो मीलद्भिर्नेत्रैः किमपि विचिन्तयन् इत एवागच्छति। तदालोकयैनम्।**]

मूढेश्वरः— (विलोक्य) एषः प्रियवयस्यो मे शुण्ठाचार्यः। तत् प्रविशामि पूजागृहम्। (इति पूजागृहप्रवेशं नाटयति)
(ततः प्रविशति यथानिर्दिष्टः शुण्ठाचार्यः)

शुण्ठाचार्यः—एष मे प्रियवयस्यो मूढेश्वरः पूजागृहे तिष्ठति। यावदुपसर्पामि। (उपसृत्य) वयस्य, वृत्तं सपर्योपकरणम्।

मूढेश्वरः—वयस्य, इदं क्रियते।

शुण्ठाचार्यः—सम्पादय शीघ्रम्। पश्यैनं नभसो मध्यदेशवर्तिनं प्रचण्डमरीचिमालिनं दिनेशम्। मध्याह्नमेनं वदन्ति मनीषिणः। तथाह्यधुना—

---

१. तु त्वया विना-B.।

तपति खरमयूखः क्षीणतामेति तोयं,
कमलदलनिषण्णाश्चञ्चरीकाः प्रयान्ति ।
बहुतरमकरन्दोत्सिक्तमध्याञ्च[1] शीघ्रं,
घनसरसिजराजीं राजहंसाः सरन्ति ॥ ३१ ॥

मूढेश्वरः —(ऊर्ध्वमवलोक्य) यतो नभोमध्यमध्यास्ते भानुमाली तज्जातो मध्याह्नसमयः । तथाहि सम्प्रति—

चण्डांशुचण्डकिरणैर्विकसत्पलाश—
मुत्तानितञ्च कमलं कमलं करोति ।
एषा च दुर्गतवधूर्नवघर्मबिन्दून्,
हारानुरोजयुगले खलु वेत्ति मुग्धा ॥ ३२ ॥

अपि च—

गण्डं फुल्लत्सरोज-व्यतिकरशिशिरैः शीकरैः शुण्डपातैः,
सिञ्चन् मन्दं करेणोर्निजमपि च करी निर्वृतिं सन्तनोति ।
दीप्यच्चण्डांशुचण्डातपविवृतमुखभ्रष्टडिण्डीरितास्यः,
पानीयोन्मज्जनजानां कुतुकमभितनोत्याशु सोऽयं लुलायः ॥ ३३ ॥

शुण्ठाचार्यः —तत् सपदि वद । किन्तेऽभिरोचते भिक्षायै ।

मूढेश्वरः —अलमनया भिक्षया । युष्मद्दर्शनमेवास्माकं भिक्षा । यद्याग्रहस्तर्हि किमनेन श्रान्तजनेन क्रियताम् । यदभिरोचते भवते ।

शुण्ठाचार्यः —तथाप्यभिधीयताम् ।

मूढेश्वरः —यद्येवं तर्ह्यभिधीयते—

दुग्धं मुग्धसरोजसुन्दरमुखीहस्ताम्बुजावर्तितं,
शाकञ्चापि शुकच्छदच्छवि तथा पेयं पयः पायसम् ।
मुक्ताहारि च तक्रमिन्दुकिरणस्वच्छं यथेच्छं दधि,
स्वादु च्छागपतेः पलं मनयते मीनो नवीनोऽधुना ॥ ३४ ॥
वटिका चणकस्य कोमला मलिका सङ्कुलिताज्यपाचिता ।
नवमाषसुपूर्णपूरिका सितखण्डाः खलु शुण्ठ रोचते ॥ ३५ ॥

शुण्ठाचार्यः— तर्ह्यागच्छ । गच्छावः ।

(इति निष्क्रान्ताः सर्वे)

इति प्रथमः सन्धिः ।

---

१. मध्याह्न-B. ।

अथ द्वितीयः सन्धिः

(ततः प्रविशति शिष्याभ्यामनुगम्यमानो मूढेश्वरः)

मूढेश्वरः —वत्स मुखर, अवेहि कियदवशिष्टमहः। व्याकुलयतितरां मे मनो मनोजपञ्चबाणी। वाणीमपि वक्तुमशक्तोऽस्मि।

मुखरः — (ऊर्ध्वमवलोक्य) भो गुरुदेअ, दाणिं क्खु भअवं सहस्सरस्सि रस्सिणिअरमज्झमज्झम्मि विणिविसिअ कुंकुमपंकसंकुलिदकामिणीकरअलसिरिसं उवक्खिअंतो मंडलसेसो पडदि। किंचि उक्खिण्णाओ तारआओ। [**भो गुरुदेव, इदानीं खलु भगवान् सहस्ररश्मीः रश्मिनिकरमध्यमध्ये विनिवेशितकुङ्कुमपङ्कसङ्कुलितकामिनीकरतलसदृशमुपक्षेपन् मण्डलशेषः पततिः। किञ्चिदुद्भिन्नास्तारकाः।**]

मूढेश्वरः — (ऊर्ध्वमवलोक्य) सम्प्रति हि—

दिनमणिरयमच्छां पद्मिनीदक्षिणां मां,
रविरविरततेजा उत्तराञ्चाविहाय।
पतति बत निषेवन् वारुणीं रागशोणा—
मिति विहसति ताराच्छद्मना शक्रकाष्ठा॥ १॥

मुखरः — दाणिं क्खु वरुणदिसाविलासिणीए किदसंकेदो संभोअसंठाविदचित्तउत्ती अत्थगिरिकाणणं पइठ्ठो जलजमित्तो जादो अकठोरो ताराविसरो। [**इदानीं खलु वरुणदिशाविलासिन्या कृतसङ्केतः सम्भोगसंस्थापितचित्तवृत्तिरस्तगिरिकाननं प्रविष्टो जलजमित्रं जातोऽकठोरः ताराविसरः।**]

मूढेश्वरः — (निपुणं विलोक्य)

सम्प्रेषिते दिनमणौ नियमानुबन्धं,
सन्धाय गाढतिमिरेण मलीमसेयम्।
नायाति अद्य इति तद्दिनशून्यबिन्दून्,
तारामिषेण तनुते पुरुहूतकाष्ठा॥ २॥

मुखरः — दाणिं क्खु जणितंधं णीलकंठकंठपीठादो जादं व्व मरगअमणिकूटादो पहुदं व्व करट्टिदाणरिंछोलीदो उप्पणं व्व

मसीसहस्सादो पिसुणजणहिअअसरिच्छं अच्छं तमो विसरदि तिहुअण-भंडिम्मि। जादं (अ)अकठोरतरतारआणिक्करुक्कंत दुद्धमुहुमोत्ताहलिल्लं व्व खंडिदाकिदअक्खरराइजुत्तं व्व णहोअलं। [इदानीं खलु जनितान्धं नीलकण्ठकण्ठपीठाद् जातमिव मरकतमणिकूटात् प्रवृत्तमिव करटिदानभ्रमरालितः उत्पन्नमिव मसीसहस्रात् पिशुनजनहृदयसदृशमच्छं तमो विसरति त्रिभुवनभाण्डे। जातञ्च अकठोरतरतारतारकानिकरोत्क्रान्तदुग्धमुग्धमुक्ताफलमदिव खण्डिताकृताक्षरराजियुक्तमिव नभस्तलम्।]

मूढेश्वरः — (विलोक्य) सत्यमन्धतमसमतितरां वरीवर्ति। तथा हि—

छिन्दन् लोहितपीतशुक्लहरितां नाम्नः कथां विष्टपे,
भिन्दन् लोचनयोस्त्रिलोकजनुषो वृत्तिं जनस्य द्रुतम्।
कुर्वन्नीलमणिप्ररोहखचितं दिग्रोदसीकन्दरं,
मातङ्गद्युति दिङ्मुखेषु तिमिराद्वैतं समुज्जृम्भते॥ ३॥

अपि च—

शिखरिशिखररूढः शाखिशाखानिषण्णो,
विपिनमथ विकीर्णस्तर्णवार्णश्च तीर्णः।
तिरयति तिमिरौघे नेत्रवृत्तिं जनानां,
पवनज इव साक्षाद् यातुधानाङ्गनानाम्॥ ४॥

अपि च—

ध्मातौघमेघं फणिरत्नरश्मि—
शक्रायुधं सम्प्रति कामिनीनाम्।
खद्योतविद्युद्भ्रमणं गताना—
मक्षक्षमं श्वभ्रमिवातनोति॥ ५॥

मुखरः — दाणिं क्खु अवस्साअकिरणो पुव्वदिसाबहूमंडणभूदो कालसेअपुंजच्छविछुरिदमंडलदाए व्विअ अरुणो संपदं क्खु विहुरकामिणीणअणगंडपंडुच्छवी पहुद-क्खअक्खीणदाए व्व पंडुरो, अहुणा अ सोडसकलाकलिदो दुद्धसाअरमुद्धमोहविसरो बिसकंदलीदावदाहणो विसमविसिहमित्तदाए विरहिणीमणोहरणो कुमुदिणीपीऊसवरिसकिरणो पीऊसकिरणो णहोअल-विउलप्पासादसिहरम्मि अहिअं सोहेदि।

[इदानीं खलु अवश्यायकिरणः पूर्वदिशावधूमण्डनभूतः कालशेय-पुञ्जच्छविच्छुरितमण्डलतयेव अरुणः, साम्प्रतं खलु विधुरकामिनी-नयनगण्डपाण्डुच्छविः प्रभूतक्षयक्षीणतयेव पाण्डुरः, अधुना च षोडशकलाकलितो दुग्धसागरमुग्धमोहविसरो बिसकन्दलीदावदहनो विषमविशिखमित्रतया विरहिणीमनोहरणः कुमुदिनी-पीयूषवर्षि-किरणः पीयूषकिरणो नभस्तलविपुलप्रासादशिखरेऽधिकं शोभते ।]

मूढेश्वरः — (ऊर्ध्वमवलोक्य) कथमारूढ एव गगनप्रासादशिखरं भगवान् मृगलाञ्छनः । तथा हि—

पूर्वं बालमृणालनालसदृशाः स्वर्मार्गसञ्चारिण—
श्चञ्चत्पुष्करिदन्तदण्डमुसलस्पर्धाकराः सम्प्रति ।
शीतांशोः किरणाः पतन्ति वसुधापृष्ठे सुधास्यन्दिनः,
सिञ्चन्तश्चलचारुचञ्चुपुटकान् क्षीबान् चकोरान् मुहुः ॥ ६ ॥

जगद्वञ्चकः — ((विलोक्य) केतकदलद्रोणीश्रेणीस्पर्द्धाकरैः करैरतितरां रोदसीकन्दरं हरिणयति हरिणलाञ्छनः । सम्प्रति हि—

वासोऽर्जुनं विचकिलै रसनाभिरामा,
मार्णालतन्तुरचितानि च कङ्कणानि ।
कान्ताभिसारसमये ललनाजनाना—
मित्थं भवन्ति सकलानि विभूषणानि ॥ ७ ॥

((विलोक्य) अहो मध्यरात्रम् । सम्प्रति हि—

भ्रान्तिं तनोति निखिलस्य च दीपवल्ली,
सञ्चिन्तितेति विरमत्यपि लोकशब्दः ।
एषोऽभिसर्पति रवः सुरताभिमत्त—
पाथोजसुन्दरमुखी-भुजकङ्कणानाम् ॥ ८ ॥

मूढेश्वरः —(शीतभानुमवलोक्य तामभिनीय च)

रत्नाकरश्च भगवाँस्तव जन्मभूमि—
रीशस्य मौलिनिलये वसतिस्त्वदीया ।
हंहो तुषारकर किं वितनोषि ताप—
मङ्गेषु [हन्त ! कुसुमेषुकृतज्वरेषु ॥ ९ ॥

अथवा—

दोषाकरः कलङ्की प्रियतरमित्रञ्च कालकूटस्य ।
स्थाने कुरङ्गलाञ्छन ! दहसि शरीरं प्रियावियुक्तानाम् ॥ १० ॥

वत्स जगद्वञ्चक ! वत्स मुखर, गच्छानय कुमुद्वतीशीतभानवीयां कलामबलां वसन्तलतिकाम् ।

मुखरः — भो अज्ज, वुट्ठो तुमं ण विरमेसि इत्थिआतिण्णादो अ उह्लं णीसासरिंछोलिअं मुंचेसि । [भो आर्य, वृद्धस्त्वं न विरमसि स्त्रीतृष्णया चोष्णं निःश्वासनिकरं मुञ्चसि ।]

महेश्वरः — किं करोमि । कामोऽतितरां बाधते माम् । किञ्च—

इयं सा कर्णाटी त्रिभुवनवधूटी-विजयिनी,
तथा चेयं वाटी प्रचुरतरपाटीरकलिता ।
तटीयं पम्पायाः पवनपरिपाटीवृतरुचि—
र्मनोधाटीमेतन्नटयति मनोभूरपि मुहुः ॥ ११ ॥

तदाशु कुसुमाशुगताड्यमानहृदयो न तद्वियोगमुरीकर्तुमुत्सहे । आनयावदातकरप्रतिपक्षवदनां ललनाम् ।

जगद्वञ्चकः — (स्वगतम्) दुष्टः खलु वृद्धोऽसौ । तद् भवतु । एन वञ्चयामि । (प्रकाशम्) यथा गुरुदेव आज्ञापयति । (इति मुखेरण सह निष्क्रान्तः)

मुखरः — भो जेठ्ठ, एदं खिडिक्किआदुआरं । ता प्पविसह्म । [भो ज्येष्ठ ! एतद् गवाक्षद्वारम् । तत् प्रविशावः] (इति तथा कुरुतः । जगद्वञ्चकः छोटिकां ददाति संज्ञया विकडं रौति च । ततः प्रविशति वसन्तलतिका)

वसन्ततिलका — दाणिं खु । [इदानीं खलु]

जगद्वञ्चकः — प्रिये, पश्य । एष सरसघनचन्दनवनसञ्चारी वाति सदागतिः । तदेतां हरिणलाञ्छनकिरणच्छविच्छुरितसुधालक्षितां पान्थपरिश्रमहरणचतुरवेदिकामालम्ब्य क्षणं प्रत्युक्षणं कुर्मः । (इति परिक्रामति)

जगद्वञ्चकः — वल्लभे, देहि सम्प्रति मारविलासमन्दिरे मन्मथक्रीडाशीविषं वस्तुम् ।

वसन्तलतिका —हीणामहे, जा आसीविसो ता भीदीए उक्कंपिदह्मि । [आश्चर्यम्, यदाशीविषस्तदा भीत्योत्कम्पितास्मि ।]
(जगद्वञ्चकमुखरौ सहस्ततालमुच्चैः हसतः)

मुखरः — णहि णहि सप्पा अण्णं किं वि । [नहि नहि सर्पः, अन्यत् किमपि ।]

वसन्ततिलका: — (सहर्षम्) जाणिदं क्खु से दुठ्ठत्तणं । ता णत्थि एत्थ तुह अवठ्ठाणोजोग्गो देसो । भाडअं क्खु बहु एदस्स मअणघरस्स । [ज्ञातं खल्वस्य दुष्टत्वम् । तन्नास्ति अत्र तवावस्थानयोग्यो देशः । भाटकं खलु बहु एतस्य मदनगृहस्य ।]

जगद्वञ्चक: — तिष्ठति भाटकम् ।

वसन्तलतिका — किं ? [किम् ?]

(जगद्वञ्चकः ग्रन्थिं दर्शयति)

वसन्तलतिका — सच्चं परं मूढेसरो दुम्मणाअंतो व्व भोदि । [सत्यं परं मूढेश्वरो दुर्मनायमान इव भवति ।]

जगद्वञ्चक: — दयिते,

एतस्मिन्नभिनवचन्दनावकीर्णे,
कान्तारे कुरु कमलाक्षि केलिबन्धम् ।
साफल्यं रचय निजस्य जन्मनस्त्वं,
किं वा ते जरठतरेण तेन कार्यम् ॥ १२ ॥

इतस्तु नेदीयान् गुरुस्तदागच्छ । गच्छावः ।

(ततः प्रविशत्युन्मत्तो मूढेश्वरः)

मूढेश्वर: — (पार्श्वतोऽवलोक्य) एषा मे प्रिया बालविटपबाहुभिस्सहकारमालिङ्ग्य सुखमनुतिष्ठति । तद् गत्वा सहकारं शिक्षयामि । (इत्युष्माणं गृहीत्वा रसालं प्रताड्य लतामुपेत्य च) प्रिये, नेदं तवोचितं मुञ्चनम् ।[1]

कलय कमलनेत्रे मां दृशोरन्तपातै—
रमृतकिरणवक्त्रेऽनल्पकालं प्रजल्प्य ।
सतनु वितनु गात्रैः पेलवैरङ्कपालीं,
परिहर दवथुं मे स्वेदनीराक्षिसिक्तैः ॥ १३ ॥

(लतामालिङ्ग्योत्थाय च दण्डवत्प्रणम्य प्रणिधानेनावतिष्ठति)

जगद्वञ्चक: — (पुनः 'एतस्मिन्' इत्यादि २।१२ पद्यं पठति)

मूढेश्वर: — (आकर्ण्य)—अहो जगद्वञ्चको नयति प्रियाम् । तद् गत्वा आनयामि । (विचिन्त्य) सत्यं खलु जगद्वञ्चकः । (अग्रतो गत्वा) प्रिये वसन्तलतिके !

---

१. 'मोचनम्' इति साधुः ।

जगद्वञ्चकः — क्व ते प्रिया ! इयन्तु मम ।

मुखरः — तुह तु माआ । [तव तु माता]

जगद्वञ्चकः — ते तु स्नुषा ।

(मूढेश्वरः दण्डकाष्ठमुद्यम्य ताडयितुमिच्छति । जगद्वञ्चको वसन्तलतिकां त्यक्त्वाऽऽराद् गच्छति । मूढेश्वरो वसन्तलतिकां गृह्णाति)

जगद्वञ्चकः — ज्ञास्यस्येतस्याविनयस्य फलम् इति । (इति मुखरेण सह निष्क्रान्तः)

मूढेश्वरः — (चन्द्रकिरणस्पर्शमभिनीय) प्रिये, पश्य पश्य—

तरुणकिरणनीवीवृद्धवर्त्मस्फुलिङ्गैः—
रदहृदयमहोदः कायमह्नाय चन्द्रः ।
सुतनु तव वियोगे सङ्गमे तेऽधुना मे,
दवथुमथ विधूयानन्दथुं सन्तनोति ॥ १४ ॥

(तस्याधः पञ्चशाखं हृदये निधाय)

मृणालीकूटः किं किमु पुटकिनीपत्रनिकरः,
करः किं शीतांशोर्मुदिरकिरदासारविसरः ।
सुधायाः सारः किं रणरणकपीठे च हृदये,
विनिक्षिप्तः कान्ते सुखयतितरां ते किसलयः ॥ १५ ॥

प्रिये वसन्तलतिके, ननु कुरु कुचयोश्चन्दनचर्चाम् ।

वसन्तलतिका —जं भवं आणवेदि । [यद् भवानाज्ञापयति] (इति तथा करोति)

मूढेश्वरः — (विलोक्य)

एकस्मिन् यदि चञ्चलाक्षिरचितः पाटीरपङ्कद्रवो,
माऽन्यस्मिन् रचयस्व चन्द्रवदने गौराङ्गि वक्षोरुहे ।
इत्थं चेद्यदि संविधास्यसितरां द्रक्ष्यामि भूमीधरा—
वेकत्रैव सुमेरुशैलतनयातातौ परं मेलितौ ॥ १६॥

(वसन्तलेखा तथा करोति)

मूढेश्वरः — (विलोक्य सानन्दमालिङ्ग्य च)

वलक्षपक्षप्रतिबद्धबिम्ब—
क्षपाकरस्पर्द्धितसुन्दरास्ये ।

जङ्घायुगं जीवितदायि रम्भा—
स्तम्भादुदञ्चत्कमनीयमीहे ॥ १७ ॥

(नेपथ्ये कलकलान्तरम्)

तिष्ठ रे मूढेश्वर स्नुषापहारिन्, सत्यं खलु मूढेश्वरः, यतः स्नुषामारूढोऽसि ।

मूढेश्वरः — अहो ! जगद्वञ्चकहतकः ।

(पुनर्नेपथ्ये)

चिठ्ठ रे दुठ्ठगरिठ्ठ चिठ्ठ । एसा अम्हे आअदा ज्जेव्व ।

[तिष्ठ रे दुष्ठगरिष्ठ तिष्ठ । एते वयमागता एव]

(ततः प्रविशतो राजपुरुषानुगम्यमानौ मुखरजगद्वञ्चकौ)

मुखरः — भो जेठ्ठ, एसो वसंदलदिआदुदीओ मूढेसरो चिठ्ठदि । [भो ज्येष्ठ, एष वसन्तलतिकाद्वितीयो मूढेश्वरस्तिष्ठति ।]

जगद्वञ्चकः — भो भो राजपुरुषाः, एष भुजङ्गो दुरात्मा मूढेश्वरः संयमनीयस्तस्या एव केशरज्जुपाशैः ।

(पुरुषास्तथा कुर्वन्ति)

मूढेश्वरः — (स्वगतं सानन्दम्)

कबरीभरेण सुतनोर्यदयं नियतस्तदप्यतिसुखाय मम ।
नवबर्हिबर्हरुचिरावृतिना दयितं भवेद्दयिततोरुतरम् ॥ १८ ॥

मुखरः — कहं रे मूढेश्वर, अज्ज वि सुहअदि वसंतलदिआ । अम्महे एं बुट्ठं तरट्टी वशंदलदिआ । (इत्यर्धोक्तौ विलोक्य) कहं जिण्णमज्जारो विअ गुरुगुराअंतो चिठ्ठदि । भो गुरुदेअचलणमिस्सा, तुम्हाणं हलहलो तत्थ राअउले ज्जेव्व भइस्सदि । [कथं रे मूढेश्वर, अद्यापि सुखयति वसन्ततिलका । अहो आश्चर्यम् ! एतं वृद्धं युवती वसन्तलतिका (इत्यर्धोक्तौ विलोक्य) कथं जीर्णमार्जार इव गुरुगुरायन् तिष्ठति । भो गुरुदेवचरणमिश्राः, युष्माकं कलकलस्तत्र राजकुल एव भविष्यति ।]

(इति सर्वे परिक्रामन्ति)

(नेपथ्ये)

भो भोः क्रियन्तां सरसचन्दनसान्द्रद्रवसेकशीतलतलाः

केलिशैलशिखरनिर्झरिणीसैकतचत्वरभूभागाः, उत्थाप्यन्ताञ्च शारदशर्वरीश्वरपाण्डुरकर-निकरच्छविच्छुरितशोभमुन्नतप्रतानवितानम्, उद्गिरन्तु नव्यसङ्गीतगीतानि, उपनयन्तु वनपालका व्रततिकुसुमस्रजः, धारयन्तु प्रतीहार्यश्चामरव्रजान्, विरमन्तु वेदध्वनयः, अलङ्कुर्वन्तु द्वारदेशं सौविदल्लाः।

नरपतिकुलमौलि-प्रस्खलन्मल्लिमाला—
बहलपरिमलालीस्पृष्टपादारविन्दः।
उषसि रहसि वेदाकर्णनोद्भूतखेदो,
हतमतिपरिवारः पापचारः समैति ॥ १९ ॥

(ततः प्रविशति पापचारो विदूषकश्च)

राजा — वयस्य, आदेशय केलिगिरिनिर्झरिणीसैकतचत्वरमार्गम्।

विदूकषः — एदु एदु भवं। एदं तं तुह अठ्ठाणजोग्गं त्थलं, ता एहि उपविसह्य। [**एतु एतु भवान्। इदं तत्तवावस्थानयोग्यं स्थलम्, तदेहि उपविशावः।**] (इत्युभावुपविशतः)

राजा — वयस्य, अद्य प्रत्यूषे श्रुतवेदपदजालज्वरोऽहमतितरां खेदतर्ति वाहयामि। तत् केन मनोविनोदमाकरोमि।

विदूषकः — भो वअस्स, वेदपदाकण्णणादो एव्वं दुम्मणाअंति भवं ता जइ अहं जेव्व बह्मणो तुह अग्गदो भणिस्सं तदो किं दाव करिस्ससि [**भो वयस्य, वेदपदाकर्णनादेव एवं दुर्मनायते भवान् तद्यदि अहमेव ब्राह्मणस्तवाग्रतो भणिष्यामि तदा किं तावत् करिष्यसि ?**]

राजा — पठ तावत्।

विदूषकः — (पद्मासने स्थित्वा) विलंची क्खु अहं सूप्पदो। तक्खणं झाणं काढुअ वेदपुलिसाणं तदो पठिस्सं। [**विरिञ्चिः खल्वहं प्रसूतः। तत्क्षणं ध्यानं कृत्वा वेदपुरुषं ततः पठिष्यामि।**] (इति ध्यानं नाटयति। पुनः सविलक्षहस्तं पठति।)

राजा — (साट्टहासम्) अहो तव वेदपठनकौशलम्। अनेन न मे कर्णज्वरः।

विदूषकः — अहो ण क्खु भोः, एसो क्खु केलीसिलुच्चअवाहिणीवीचीणिच्चअ-वइअर-पकड्दि-सीअलगुणो घणीभूद-पूअ-तापिंछ-

पमुहरुक्खणिरूहिअमंदगमणो घणचंदणवणप्फंससुरही सुहअदि तुह समीवे समीरणो। [अहो नु खलु भोः, एष खलु केलिशिलोच्चयवाहिनीवीचिनिचयव्यतिकरप्रकटितशीतलगुणो धनीभूतपूगतापिच्छप्रमुखवृक्षनिरुद्धगमनो घनचन्दनवनस्पर्शसुरभिः सुखयति तव समीपे समीरणः।]

राजा — (पवनस्पर्शसुखमभिनीय) वयस्य, पश्य—

ईषत्प्रफुल्लदरमीलितयोः प्रभाते,
वायुर्वहन् कमलकैरवयोः सुगन्धी।
भूयो नयन् स्मृतिपथं ललनामुखाब्ज—
सौरभ्यमाशु मम तोषयतीह चेतः॥ २०॥

विदूषकः — एव्वं एव्वं एदं। [एवमेवेदम्]

(प्रविश्य प्रतीहारः)

प्रतीहारः — जयतु जयतु महाराजः। महाराज, केचिज्जटिलानादाय स्त्रियं (च) भवत्पुरुषनियन्त्रिता द्वारदेशमध्यासते।

विदूषकः — महामदि, झत्ति प्पवेसअ। इत्थिआ चिट्ठदि ता जीविदह्मि। [महामते, झटिति प्रवेशय। स्त्री तिष्ठति तज्जीवतोऽस्मि।]

राजा — वयस्य, योषिन्नामग्रहणादात्मन्यपि योषिद्व्यवहारमुरीकरोषि।

विदूषकः — झत्ति प्पवेसअ। [झटिति प्रवेशय]

प्रतीहारः — तथा (इति निष्क्रान्तः)

(ततः प्रविशन्ति वसन्तलतया सह जगद्वञ्चकमुखरमूढेश्वराः पुरुषाश्च)

पुरुषः — जयतु जयतु महाराजः। महाराज, एष दुरात्मा मूढेश्वरः। इमौ चोभौ शिष्यावेतस्य जगद्वञ्चकमुखरौ। एताभ्याञ्चासौ गुरुः मूढेश्वरः सह वसन्तलतया धृतः। (इति करेण वसन्तलतां दर्शयति)

राजा — वयस्य, पश्य पश्य—

एषा दोषारमणवदना मुग्धनीलोत्पलाक्षी,
लक्ष्यीकृत्य क्षणमिह मम क्षोणिनाथस्य वक्षः।

क्षिप्रक्षामोदरपरिसराक्षोदशेषं कटाक्षै—
श्चक्रे क्षोण्यां क्षपितमदनाखर्वसौन्दर्यगर्वा ॥ २१ ॥

विदूषकः — ण लक्खीअदि तुह वरक्खरक्खोदो हिअअं जेव्व चिठ्ठदि। ता किं मिच्छावग्गणं करेसि। [न लक्ष्यते तव वराक्षरक्षोदः, हृदयमेव तिष्ठति। तत् किं मिथ्यावल्गनं करोषि।]

राजा — (वसन्तलतावदन विलोक्य विभाव्य च) भो वयस्य, पश्य पश्य—

साद्दश्यं स्मरणस्य बोधकमिति स्पष्टं प्रजल्पन्ति ये,
ते मूढा नितरां गिरामपि लसल्लीलावलीलाञ्छनाः।
नो चेन्मन्दसमीरसङ्गविचलत्पद्माच्छनेत्राननं,
शीतांशुं कथमत्र निर्वृतिकरं विस्मारयत्याशु माम् ॥ २२ ॥

(सन्तापमभिनीय च) वयस्य, दुनोति मामियमुत्पलाक्षी तत् सपद्येनामुत्थापयामि।

(नेपथ्ये वैतालिकः)

भाविकमादिशतु महाराजायादिमा सन्ध्या। सम्प्रति हि—

भाण्डे कुण्डे मिहिरकिरणं वीक्ष्य सैरन्ध्रिकासौ,
स्वैरं स्वैरं सरसिजमुखी पादयो रञ्जनाय।
लाक्षाभ्रान्त्या नरप जगृहे पाणिपद्मेन पश्चाद्,
मत्वा मन्दं रविकर इति ह्रीनतास्या बभूव ॥ २३ ॥

मूढेश्वरः — (आकर्ण्य) एष मागधो वर्णयति भानुभानुप्रचारम्। (विलोक्य। अञ्जलिं बद्ध्वा)

प्रवन्दारुवृन्दारवालीकदेश—
स्खलन्मञ्जुमन्दारचञ्चत्पदाब्जम्।
नमामि त्रिलोकीकृतं साक्षिभूतं,
तमिस्रातमस्तस्करं भास्करं तम् ॥ २४ ॥

(इति प्रणमति)

विदूषकः — (विलोक्य) अम्मो ! किं उण एसो जवणो विअ संभं वंदेदि। ण उण एसो अह्माणं बह्मणाणं गोत्ते आआरो। ता अअं जवणो ज्जेव्व चिठ्ठदि। जदो एदस्स सिसिणपेरंतप्पभूद बालसरिछो कुच्चो। (विभाव्य) अहो, ण ऐसो जवणो जदो जडाओ चिठ्ठदि। अहवा जवणो जडिलो भोदि।

[अहो किम्पुनरेष यवन इव सन्ध्यां वन्दते । न पुनरेषोऽस्माकं ब्राह्मणानां गोत्रे आचारः । तदयं यवन एव तिष्ठति । यत एतस्य शिश्नपर्यन्तप्रभूतबालसदृशः कूर्चः । (विभाव्य) अहो न एष यवनः, यतो जटास्तिष्ठन्ति । अथवा यवनो जटिलो भवति ।]

राजा — वयस्य, यवनो जटिलोऽपि भवति ।

विदूषकः — भोदि ज्जेव्व । [भवत्येव]

राजा — कथम् ?

विदूषकः —जहा तुरुक्को बह्मणो भोदि । [यथा तुरुष्को ब्राह्मणो भवति]
(सर्वे हसन्ति)

विदूषकः — भो सअं णं एव्वं पुच्छामि । [भोः सर्वं नन्वेवं पृच्छामि ।]

राजा — भवतु एवम् । (पुरुषं प्रति) पृच्छैनम् ।

पुरुषः — अले ले को उण दे देसो । [अरे रे, कः पुनस्तव देशः]

मूढेश्वरः — मध्यदेशः ।

पुरुषः — किं उण दे गोत्तं । [किम्पुनस्तव गोत्रम् ?]

मूढेश्वरः — मूढेश्वरः ।

पुरुषः — एदं तु जाणीअ गोत्तं पुच्छामि । [इदं तु ज्ञात्वा (तं) गोत्रं पृच्छामि ।]

मूढेश्वरः — हिमालयः मलयः सुमेरुः ।

पुरुषः — सच्चं कहेहि रे किं वि किं वि मा जप्प । अण्णहा लोहकठिणेहिं अह्माणं पाअपोप्पेहिं ख्खोदीभूदो भविस्ससि । [सत्यं कथय रे, किमपि किमपि मा जल्प । अन्यथा लोहकठिनैरस्माकं पादपद्मैः क्षोदीभूतो भविष्यसि ।]

मूढेश्वरः — लोहकठिनान्यत एव पद्मानि । अहो वाग्मित्वम् ।

पुरुषः — झत्ति कहेहि ले । [झटिति कथय रे]

मूढेश्वरः — किमर्थम् ?

विदूषकः — तुह कण्णआए विवाहं कादुं । [तव कन्यकाया विवाहं कर्तुम्]

मूढेश्वरः — मत्कन्यां त्वं विवाहितुमर्हसि ?

विदूषकः — अह्माणं सिट्ठत्तणं गोत्तं अ इंदिरादइओ वि वण्णिदुं ण

पारेदि। को उण तुमं माणुसमक्कडो। रे रे माणुसमक्कडा पेक्ख पेक्ख । [अस्माकं शिष्टत्वं गोत्रञ्च इन्दिरादयितोऽपि वर्णयितुं न पारयति। कः पुनस्त्वं मानुषमर्कटः। रे रे मानुषमर्कट पश्य, पश्य]

पुव्वं गदं हरघरंमि मए अ तेण,
पक्खालिदं गिरिसुदा-कर-णीरजेहिं।
जंघाजुअं अ परिकप्पिदं आसणं मे,
ता इच्छिआ करजफंसवसेण मुक्कं ॥ २५ ॥

[पूर्वं गतं हरगृहे मया च तेन,
प्रक्षालितं गिरिसुताकरनीरजैः।
जङ्घायुगं च परिकल्पितमासनं मे,
तदिच्छिता करजस्पर्शनेन मुक्तम् ॥]

मूढेश्वरः — (विहस्यात्मगतम्) अहो दुरात्मनो वचनभङ्गीनागरता, तदेनं प्रत्येवम्। (प्रकाशम्) कथं रे न वाञ्छस्यस्मान्। पश्य—

अस्माकं नियमोऽस्ति दैवतसरित्कल्लोलिकिर्मीरिते,
स्थाने स्थेयमतो मुरारिभवनं याता वयं तत्र च।
तां दृष्ट्वा चरणे शिवस्य सदनं याताश्चलज्जाह्नवी—
वीचीपुञ्जतरेण जातु सहसा तेनापि मूर्ध्ना धृताः ॥ २६ ॥

विदूषकः — (सहसोपसृत्य) एसो तुम्हाणं बुढ्ढाणं चलणेसु पढितु उवगदो [एष युष्माकं वृद्धानां चरणेषु पतितुमुपगतः] (इति जटां धृत्वा तच्छिरो निजपादे स्थापयति।)

राजा — (विहस्य) विपरीतं खल्वेतदभिवादनम्।

विदूषकः — अहिठ्ठलाही होहि। [अभीष्टलाभी भव]

मूढेश्वरः — ऋषिभ्यः आशीर्ग्रहणं योग्यम्।

विदूषकः — किं तुमं इसी त्ति ण जाणे। खंतव्वं मे अवराहो [किं त्वं ऋषिरिति न जाने क्षन्तव्यो मेऽपराधः] (इति तस्य कर्णौ मर्दयति। सर्वे हसन्ति)

विदूषकः —तुमं इसी एसा उण का ? [त्वम् ऋषिरेषा पुनः का]

मूढेश्वरः — अस्माकं सहधर्मचारिणी।

विदूषकः — तुह्माणं को उण अस्समो ? [युष्माकं कः पुनराश्रमः ?]

मूढेश्वरः — गृहस्थाश्रमः।

विदूषकः — तं एस ज्जेव्व । कहहि ठ्ठाणं पुच्छामि । [तदेष एव । कथमवस्थानं पृच्छामि]

मूढेश्वरः — भो भगवतो निर्मेघाश्रमस्यावस्थाने ।

विदूषकः — एक्को णिम्मेघो तुमं जेव्व । (राजानं प्रति) महाराअ, उइदं दे अदिहीणं पज्जुवासणं । [एको निर्मेघस्त्वमेव । महाराज, उचितं तेऽतिथीनां पर्युपासनम्]

राजा — यथाह प्रियवयस्यः । (इति मूढेश्वरं हस्ते गृहीत्वा सम्पूज्य मधुपर्काय समदं सौरभं सौरभमुपनयति)

मूढेश्वरः — (सहर्षं विलोक्य) युक्तमुक्तञ्च—'महोक्षं वा महाजं वा श्रोत्रियाय विकल्पयेत्' इति ।

विदूषकः — सच्चं चिठ्ठदि इसित्तणं एदस्सिं जदो रमणिज्जो उक्खो इक्खुव्व मडमडाइदो । भो अण्णं किं वि जाणासि । किं उण उक्खं मडमडितुं जेव्व । [सत्यं तिष्ठति ऋषित्वमेतस्मिन् यतो रमणीय उक्षा इक्षुरिव मडमडायितः । भो अन्यत् किमपि जानासि । किं पुनः उक्षाणं मडमडितुमेव ।]

मूढेश्वरः — सर्वं जानामि यत् पृच्छसि । पश्य—

द्रुहिणगिरिशपद्माधीशलेखेशमुख्या—
नथ यदि त्रिदशान्ते वीक्षितुं कौतुकौघः ।
हिमकिरणमिहस्थं घर्मराशिञ्च तूर्णं,
मुनिगणमपि तुभ्यं दर्शयामि क्षणेन ॥ २७ ॥

(प्राकृतमाश्रित्य) अवि अ मह कोदूहलम्मि—
एर्तास्सि णइसोत्ते एरायणप्पहुदिणो दिसाइगम्र ॥
मग्गा दाणि पुच्छसि चक्कीवंदा तुमं सलिलं ॥ २८ ॥

[अपि च मम कौतूहले—

एतस्मिन् नदीस्रोतसि ऐरावणप्रभृतयो दिशानां गजाः ।
मग्नां इदानीं पृच्छसि चक्रीवँस्त्वं सलिलम् ॥]

(आकाशे) हा देव्व एआरिसा मज्झविज्जाए परीक्खआ उपादिदा । भोदु । [हा दैव, एतादृशा मम विद्यायाः परीक्षका उत्पादिता । भवतु]

(प्रविश्यापटीक्षेपेण निर्मेघाश्रयः)

निर्मेघाश्रयः — वत्स मूढेश्वर,

मूढेश्वरः — कथं भगवान् निर्मेघाश्रयः।

विदूषकः — (समभिसृत्य) दुवे वि णिम्मेहा मिलिदा ता ण उण उचिदं एदाण णिम्मेहाणं सहाए अह्मारिसाणं छइण्णाणं उवविठ्ठुं। [**द्वावपि निर्मेघौ मिलितौ तन्नोचितमेतयोः निर्मेघयोः सहायेऽस्मादृशानां यूनामुपवेष्टुम्।**] (इति सरभसं गन्तुमिच्छति)

(राजा बलादेनं स्थापयति)

निर्मेघाश्रयः — वत्स, मूढेश्वर, किमिति त्वमस्मिन्नरपतिमौलितिलकद्वारभूषणमभवः।

मूढेश्वरः — भगवन् सर्वाद्भुतनिधे, एतस्या मम धर्मचारिण्या निमित्तमाभ्यामन्तेवासिभ्यामेतावद्दूरमुपढौकितोऽस्मि। इयञ्च मे धर्मनारीति भवन्त एव जानन्ति।

निर्मेघाश्रयः — नारीति विघ्न एव। (स्वगतम्) इयं काचित् पुरनारी अमुना हृतेति विभावयामश्चेतसि। तदेनं प्रत्येवम्। (प्रकाशम्) (निपुणं विलोक्य) एषास्माकं कनीयसा बुद्धिविरोधिना परिणीतपूर्वा कालिन्दीसहोदरा इति।

मूढेश्वरः — अश्रुतमिव।

(प्रविश्य प्रतीहारः)

प्रतीहारः — जयतु निखिलभूभुग्भट्टारकः। देव, मङ्गलकुठारमिश्रो द्वारदेशमलङ्करोति।

राजाः — सपदि प्रवेशय।

प्रतीहारः — यदादिशति देवः। (इति निष्क्रान्तः)

(ततःप्रविशति मङ्गलकुठारमिश्रः)

शम्भोर्जटाजूटतटे निषण्णां,
भागीरथीं सन्ततमाश्रयामः।
यस्याः कणस्पर्शवशान्नराणां,
वृन्दारकत्वं सहसाभ्युपैति ॥ २६ ॥

(विचिन्त्य:) आदिष्टोऽस्मि तत्रभवता शुण्ठाचार्येण। यथा—वत्स मङ्गलकुठार, अभिसरसि तावत् पम्पातीर-

परिसरमेव तद्भगवतो भवानीवल्लभस्य पूजां निर्वर्तयितुम्। तदभिसर। तेनैव पथा राज्ञः पापाचारस्य सदनं गत्वा वयस्यो मूढेश्वरो वसन्तलतया सह मोच्य इति। तत् कृत्वा सपर्यां प्राप्तोऽस्मि राजभवनम्। यावदुपसरामि। (इति परिक्रामति)

निर्मेघाश्रयः — (सोपहासं सम्भ्रमम्)

मृत्स्नामण्डितमुण्डपिण्डहृदया रुद्राक्षभस्माङ्किता—
स्ते दर्भार्भकमण्डितोद्भटकरा मिश्रास्समायान्त्यमी।
पम्पातीरतरङ्गरिङ्गणजुषः पिण्डाशया पीवरान्,
मीनान् स्थाप्य च वंशपात्रपुटके वृन्दारकव्याजतः ॥ ३० ॥

मङ्गलकुठारमिश्रः — (उपसृत्य। राजानं प्रति) महाराज,

वृद्धां कीर्तिलतां प्रतापदहनं ब्रह्माण्डभाण्डोदरे,
किञ्च स्थापयता त्वया न विहितं साश्चर्यमेतज्जगत्।
जीयाः पद्मभुवस्सहस्रमधिकं वर्षाणि वर्षन् भृशं,
तर्षं किञ्च वनीपकस्य सततं घूस्नानिः (?) संघर्षयः ॥ ३१ ॥

राजा — (प्रणम्य। आसने उपवेशयति)

विदूषकः — 'सेहि दाव कोदूहलं [**दर्शय तावत् कौतूहलम्**]

मूढेश्वरः — यदादिशति राजपुत्रः, नहि नहि राजपुरुषः।

विदूषकः — (सक्रोधम्) आः दासीए पुत्ता, रण्णो सहाए असबद्धं प्पलवेसि। [**आः दास्याः पुत्रक, राज्ञः सहाये असम्बद्धं प्रलपसि**]

(मूढेश्वरः ध्यानं नाटयति) (प्रविश्य पुरुषः)

पुरुषः — हग्गे, दंशेमि दाव एताणं मुत्तीणं शलूवं रण्णो महालाए एशे पोम्माशणे, एशे गिलिशे, एशे पोम्माधीशे, एशे कमलेशे (इति दर्शयति। पुनर्विलोक्य) अले अले जडिले, के उण ऐशे तुए णिप्पादिदे। [**अहो, दर्शयामि तावदेतासां मूर्तीनां स्वरूपं राज्ञे महाराजाय—एषः पद्मासनः, एष गिरिशः, एषः पद्माधीशः, एषः कमलेशः** (इति दर्शयति। पुनर्विलोक्य) **अरे अरे जटिल, के पुनरेते त्वया निष्पादिताः।**]

मूढेश्वरः — एते सप्तर्षयः।

पुरुषः — एशे तें उण शत्तमुणिणि। [**एते ते पुनः सप्तमुनयः**]

मुढेश्वरः — अथ किम् ।

पुरुषः — हग्गे केलिआए दाशीए उत्त अक्खिणी मीलिअ कीशठिदे । [अहो कीदृशाः दास्याः पुत्राः, अक्षिणी निमील्य किं कृते स्थिताः ।] (इति लगुडं गृहीत्वा ताडयितुमिच्छति । मूढेश्वरो यष्टिं भ्रामयित्वा निष्क्रामति ।)

विदूषकः — (विलोक्य) अहह !

गिलीशबह्मचंदओ महींद-विण्हुसुज्जओ ।
तिलोहिदा अ ईसिणो मूलीशेण माणिणो ॥ ३२ ॥
[गिरिशब्रह्मचन्द्रका महेन्द्रविष्णुसूर्यकाः ।
तिरोहिताश्च ऋषयो मुनीश्वरेण मानिनः ॥]

मङ्गलकुठारमिश्रः — (वसन्तलतां निर्वर्ण्य) निष्क्रामन्तां नाम । किं तेन इयं भाति पुरतः—

ब्रह्मेशमेशमुख्या देवा यस्य विलोचने वसन्ति ।
शितिलोहितकैतवतः स्पर्शसुखं सङ्गृहीतुमिव ॥ ३३ ॥

अपि च—

नासा सेतितरां पयोधरघटी निःपेषमालिङ्गनं,
नो याचे न न मेति पूर्वकमथो मिष्टाक्षरं चुम्बनम् ।
अस्याश्चेच्चलतारकं मयि भवेन्नेत्रान्तसंवीक्षणं,
कः काकः किल पाकशासन इति ख्यातो वराकस्तदा ॥ ३४ ॥

राजा — भगवन्, भवदायत्तैवेयम् । तर्ह्यनुगृह्यताम् ।

विदूषकः — ता गेह्णदु मिस्सो रण्णो अणुग्गहं । अज्ज तुह भाअधेअंमि मोरा णच्चंदि । [तत्र गृह्णातु मिश्रः राज्ञोऽनुग्रहम् । अद्य तव भागधेये मयूराः नृत्यन्ति ।

जगद्वंचकः — गृह्णन्तु मिश्राः ।

मुखरः — कप्पासेण दे सीसं सुडिदं । [कार्पासेन ते शीर्षं क्षुदितम्]

निर्मेघाश्रमः — मया निजप्रजावतीत्वं विधाय भवद्भ्यो दत्तेति ।

मूढेश्वरः — (स्वगतम्) सर्वत्र परेष्टघातका मिलिताः । यद्भवतु तद्भवतु ।

मङ्गलकुठारमिश्रः — सत्यमुक्तं चतुरुदधिवेलावलयितेलावलयाधिष्ठित-

कीर्तिस्तम्भेन महाराजेन परन्तु शुण्ठाचार्यो दुर्मनस्को भविष्यति ।

राजा — मदभिधया न शुण्ठाचार्यचित्ते व्यलीकशङ्कोदेष्यति ।

मङ्गलकुठारमिश्रः — तथापि तच्चेतस्तादृशे कर्मणि प्रवर्तते ।

राजा — सत्यनत्याप्यान [……] परिवर्तते शेमुषी विदुषाम् ।

विदूषकः — (संस्कृतमाश्रित्य । सोपहासम्) भवन्त्येतादृशा हि संख्यावन्तः । यतः—

अजानन्तः शास्त्रं श्रुतिषु नितरां मूढमतयो,
न जाताः कामारेः पदयुगलपाथोजरसिकाः ।
प्रगल्भन्ते नित्यं करयुगशिरःकम्पनविधौ,
नरास्ते विद्वांसः शिव शिव कलेरेष महिमा ॥ ३५ ॥

(सर्वे उपहसन्ति)

मङ्गलकुठारमिश्रः — (राजानं प्रति) महाराज यथाह शुण्ठाचार्यस्तदस्मै वयस्याय मूढेश्वराय प्रयच्छतामियम् ।

राजा — यदभिरोचते भवते । (इति वसन्तलतां मूढेश्वराय प्रतिपादयति ।)

मङ्गलकुठारमिश्रः — मूढेश्वर, किन्ते भूयः प्रियमुपकरोमि ।

मूढेश्वरः — वयस्य, इतः परमपि प्रियमस्ति । तथापीदमस्तु—

(भरतवाक्यम्)

एते पचेलिमसुधा-मधुराधरायां,
वाचाविलासविसरा विदुषां भवन्तु ।
पाथोधयश्च धरिणीं जलधोरणीभिः,
सिञ्चन्तु भूमिपतयो वसुधामवन्तु ॥ ३६ ॥

(इति निष्क्रान्ताः सर्वे)

॥ इति द्वितीयः सन्धिः ॥

॥ इति नरहरिदीक्षितसनुसूरिदीक्षितसामराज-
विरचितं '**धूर्तनर्तकं**' **नाम प्रहसनं** समाप्ति[1]मगमत् ॥

॥ शुभमस्तु ॥

---

१. समाप्तिमगमत् शके १६४५ रुधिरोद्गारिवत्सरे ज्येष्ठशुद्धसप्तम्याम् ।

धूर्तनर्तक-प्रहसनस्य

पद्यानुक्रमणिका

[अस्यामनुक्रमणिकायां क्रमेण प्रतिपद्यमाद्यपदं तदग्रे सन्धिनिर्देशस्तथा पद्याङ्कनिर्देशो विहितः]

—×—

विद्यापीठ के महत्वपूर्ण प्रकाशन

१. काश्मीरेतिहासः	पं० श्रीहनुमत्प्रसादशास्त्री	15.00
२. गीतिकादम्बरी	श्रीअमीरचन्द्र शास्त्री	20.00
३. अध्वरमीमांसाकुतूहलवृत्ति भाग I	सं० श्रीपट्टाभिरामशास्त्री	30.00
४, ,, भाग II	,,	30.00
५. ,, भाग III	,,	15.00
६. ,, भाग IV	,,	31.00
७. पाणिनि, कात्यायन एण्ड पतञ्जलि	श्री के० माधवकृष्ण शर्मा	15.00
८. ऋग्वेदकविविमर्शः	डॉ० मधुकर गो० माईणकर	3.00
९. पञ्चामृतम्	पांच विद्वानों के भाषणों का संग्रह	15.00
१०. प्रमाणप्रमोदः	म० म० चित्रधरशर्मा, सं० श्रीमती उज्ज्वला शर्मा	7.50
११ नित्यकर्मप्रकाशः	श्री भवानीशंकर त्रिवेदी	4.00
१२. संस्कृत-साहित्य में शब्दालङ्कार	डॉ० रुद्रदेव त्रिपाठी	40.00
१३. ऋतु इन संस्कृत लिटरेचर	डॉ० वी० राघवन्	30.00
१४. रससिद्धान्तः	डा० नगेन्द्र, अनु० श्रीअमीरचन्द्र शास्त्री	15·00
१५. बौद्धालङ्कारशास्त्रम्	अनु० तथा सं० डॉ० ब्रह्ममित्र अवस्थी	15-00
१६. सञ्चारी भावों का शास्त्रीय अध्ययन	डॉ०रघुवीरशरण व्यथित	20.00
१७. अध्यनन-माला	(प्रथम कुसुम)	10.00
१८. प्रवचन-परिजातः	दो विद्वानों के भाषणों का संग्रह	6.00
१९. चान्द्रव्याकरणवृत्तेः समालोचनात्मकमध्ययनम्	डॉ० हर्षनाथमिश्र	23.00
२०. महामहोपाध्यायश्रीपरमेश्वरानन्दनशास्त्रि-स्मृतिग्रन्थ		35.00
२१. भाषणभूषण—६ भाषणों का संग्रह		1.25
२२. राघवाह्निकम् (गेयकाव्य)	सं० तथा अनुवादक डॉ० रुद्रदेवत्रिपाठी	1.00
२३. जीवन-परिमल (म० म० श्रीपरमेश्वरानन्द शास्त्री का जीवन-चरित एवं संस्मरण)	लेखक डॉ० रुद्रदेव त्रिपाठी	3.00
२४. रससीमांसा (सटीक)	अनुवादक डा० रुद्रदेव त्रिपाठी	1.25
२५. देवीपुराणम् (आलोचनात्मक संस्करण)	स. डॉ० पुष्पेन्द्रकुमार शर्मा	40.00
२६. श्रीमहावीर परिनिर्वाणस्मृतिग्रन्थ	प्र० सं० डॉ० मण्डन मिश्र	21.00
२७. श्रीमहावीर—चरितामृतम्	डा०रुद्रदेव त्रिपाठी	1.00
२८. कृष्णयजुर्वेदीय तैत्तिरीय संहिता, सायणभाष्य अनुवाद		यन्त्रस्थ
२९. अन्वेषणा	प्र०सं० डॉ० मण्डनमिश्र	33.00
३०. व्याख्यान-वल्लरी	सम्पादक डॉ० रुद्रदेत्र त्रिपाठी	4.00
३१. चित्रबन्धावतरिका	सम्पादक एवं अनु० डॉ० रुद्रदेव त्रिपाठी	2.50
३२. शाङ्करस्तोत्रद्वयम्	प्र. सं डॉ०सी आर० स्वामिनाथन	1.00
३३. धूर्तनर्तकम् (प्रहसनम्) श्रीसामराजदीक्षित कृत मूल	स०-श्रीबाबूलालशुक्ल	

प्राप्ति स्थानः—

श्रीलालबहादुरशास्त्री केन्द्रीय संस्कृत विद्यापीठ

१/६ शान्तिनिकेतन, नई दिल्ली-२१